# पाणिनीयव्याकरणव्याख्याने नेपालदेशीयमवदानम्

भवानीशङ्करभट्टराईः, विद्यावारिधिः
सहप्राध्यापकः-नव्यव्याकरणम्
नेपालसंस्कृतविश्वविद्यालयः-पिण्डेश्वरविद्यापीठम्, धराननेपालः
dikshitbhattarai072@gmail.com
https://doi.org/10.3126/ss.v3i03.83425

## लेखसारः

नेपाले पाणिनीयव्याकरणस्य प्रयोगः, तस्य पठनपाठने, तमधिकृत्य ग्रन्थव्याख्यानटिप्पनादिलेखनम्, तदनुसारेण शिलाताम्रकर्गजादिष्वभिलेखनिर्माणञ्च लिच्छविकालतोऽद्यावधिर्निरवच्छिन्नतया जातं जायमानञ्च दृश्यते । नेपालदेशीयेन सर्वकारेण, संस्कृतनिकायेन, संस्कृतविद्यालयगुरुकुलादिभिः, संस्कृतविश्वविद्यालयेन स्वतन्त्रैर्विद्वद्भिश्चानेकेषु कार्येषु कृतेष्वपि तेषां सर्वेषामेकीकृतं विवरणमद्यावधौ कुत्रापि न लभ्यत इति दुःखस्य विषयः। ग्रन्थानामेकीकृतविवरणाभावेन तैः प्रदत्तेष्ववदानेष्वऽप्यज्ञातप्राया एव वयम्। एषा च जटिला समस्या। तां च समस्यां समाधानार्थमेव- पाणिनीयव्याकरणव्याख्याने नेपालदेशेन किमवदानं कृतम् ? नेपालदेशेन तथाविधमवदानं कृतमिति कथं ज्ञायते ? तस्यावदानस्य किं मूल्यमिति शोधप्रश्नमुपस्थाप्य लेखोऽयं प्रकल्प्यते। लिच्छविकाले संस्कृतं राजभाषात्वेन प्रतिष्ठितमासीत्, तदानीं चन्द्रगोमिनामकेन केनचिद् विदुषा चान्द्रव्याकरणं रचितमासीत्। तदुपरि च सुमतिपञ्जिका-शब्दलक्षणविवरणपञ्जिका-चन्द्रव्याकरणपञ्जिकादयो नैकाष्टीकाः देवनागरीरञ्जनादिषु लिपिषु संस्कृतगिरा रचिता आसन्निति विभिन्नैः प्रमाणैर्वंशावलिकारकथनैश्च प्रमाणितं भवति। लिच्छविकाले प्राप्ता द्विशताधिका संस्कृताभिलेखास्तदानीमेव समुपलब्धाष्टीकाग्रन्थाश्च एतत्प्रमाणीकुर्वन्ति मल्लकालेऽपि सृजनसमालोचनव्याख्यानटिप्पनादिप्रयोजनार्थं सहस्राधिकाः संस्कृतग्रन्था विरचिताः प्राप्यन्ते । तेषु उमानाथार्याल-पृथ्वीपालसेन-लक्ष्मणकवि-नीलदेवपन्त-सुकृतिदत्तपन्तप्रभृतिभी रचितानि ग्रन्थरत्नानि मुख्यानि स्थानानि बिभ्रति। येषां पाणिनीयानुसारि भाषिकमनुशासनं नवनवोन्मेषकं चिन्तनं चोत्तरवर्त्तिनां कृते महदुपकाराय प्रकल्पते । ततो शाहराणयोः काल समायाति । शाहकाले राम-पृथ्वीनारायण-गीवार्णादिभिरनेकैः शाहवंशीयैर्राजभिः शिलालेखस्थापनसंस्कृत-पाठशालासञ्चालन-विद्वत्पुरस्करणादिभिरनेकानि कार्याणि कृतानि। राणाशासकैरपि संस्कृतवाङ्मयस्य

तदन्तर्गतस्य च पाणिनीयव्याकरणस्य च व्याख्यानाय तथा विस्ताराय ५७ सङ्ख्यातोऽधिकभाषापाठ-शालास्थापनेन, तत्र सुव्यवस्थापनेन ग्रन्थलेखनार्थं प्रेरणेन चानेकानि कार्याणि सम्पादितानि । तदनु समागतेन प्रजातन्त्रकालेन विद्यालयस्तरे संस्कृतविषयनिर्धारणेन, शताधिकसंस्कृतमाध्यमिकविद्यालयानां गुरुकुलानाञ्च संस्थापनेन तथा महेन्द्रसंस्कृतविश्वविद्यालयस्य च स्थापनेन पाणिनीयव्याकरणव्याख्यानाय च प्रत्यक्षाप्रत्यक्षतोऽवदानं कृतं दृश्यते। अमुनैव कालेन साधारणविद्यालयानां ६-८ कक्षासु संस्कृतविषयोऽनिवार्यत्वेन दशवर्षाणि (२०५१-२०६१ मध्ये) यावद् निर्धारितानि। तत्रापि पाणिनीयमनुशासनमधिकृत्यैव संस्कृतस्य पठनपाठने सञ्चालिते। गणतन्त्रकाले च स्थानीयस्तरे शिक्षाधिकारेषु सम्प्राप्तेषु शताधिकानि गुरुकुलानि स्थापितानि, तेषां सञ्चालनव्यवस्थापनादिषु पालिकाभिर्यथाशक्यमवदानानि कृतानि क्रियमाणानि च सन्ति। प्रजातन्त्रकाले तथा गणतन्त्रकाले च महेन्द्रसंस्कृतविश्वविद्यालयेन (गणतन्त्रकालेऽस्य नाम परिवर्त्य नेपालसंस्कृतविश्वविद्यालयो जातः) तथा तत्र प्राध्यापनरतैर्विद्वद्भिः पाणिनीयं व्याकरणमाश्रित्य शताधिकानि व्याख्यानि विरचितानि विरच्यमानानि च सन्ति, स्वतन्त्रा विद्वाँन्सोऽपि पाणिनीयं व्याकरणमाश्रित्य व्याख्यानानि विरचयन्तः सन्ति। अतः पाणिनीयव्याकरणविस्ताराय तद्व्याख्यानाय च नेपालदेशीयानां विदुषां माध्यमेनैतेन देशेन महत्त्वपूर्णमवदानं कृतं वर्तत इति निष्कर्षः ।

अस्य लेखस्य रचनायां मूलतो भौतिकपुस्तकालयतस्तथांशतो वैद्युतपुस्तकालयतश्च सामग्रीः सङ्कलय्य ताः परिशील्य च निष्कर्षो निष्पादितो वर्तते। अस्य रचनायां मुख्यतो गुणात्मिका पद्धतिरवलम्बिता वर्तते। अत्र मूलतो द्वितीयकस्रोतसः सामग्र्यः सङ्कलय्य व्याख्याताः सन्ति। सामग्रीविश्लेषणं मूलतो वर्णनात्मिकया पद्धत्या जातमस्ति तथापि केषुचित् स्थानेषु व्याख्यानविश्लेषणात्मिका पद्धतिरप्यवलम्बिता वर्तते। सन्दर्भाङ्कने सन्दर्भसामग्रीसूचीनिर्माणे चात्र मुख्यतो लेखकमितिपद्धतिः (APA 7th ed.) अवलम्बिता वर्तते । तथापि सस्कृताय तस्या असङ्गत्यां प्रतीतायां क्वचित् परम्परिता पद्धतिरपि प्रयुक्ता वर्तते।

**शब्दकुञ्जिका-** चन्द्रगोमी, नेपाले पाणिनीयव्याकरणव्याख्यानम्, लिच्छविकालिकसंस्कृतवाङ्मयम् ।

## विषयप्रवेशः समस्याया उद्भावनञ्च

पाणिनीयव्याकरणविस्तारे नेपालदेशेन महदवदानं कृतं वर्तते। नेपालोद्भवैर्वैयाकरणैरन्वेषकैरैतिह्यैश्च पाणिनीयव्याकरणसम्बद्धेष्वनेकेषु विषयेष्ववदानं कृतमस्ति । तेष्वऽष्टाध्यायीव्याख्यातृभिः, प्रक्रियापरिष्कारकैः, प्रक्रियाव्याख्यातृभिः, कौमुदीसङ्क्षेपकैः, पाणिनेरैतिह्यान्वेषकैः, व्याकरणशास्त्रेतिहासानुशीलकैः, शब्दशास्त्रीयविषयपरिशीलकैस्तथा व्याकरणपठनपाठनसञ्चालकैः

शैक्षिकनिकायैः कृतानि कार्याणि महान्ति विद्यन्ते। नेपालदेशतो रचितं प्रथमं संस्कृतव्याकरणं लिच्छविकालिकस्य नृपतेरंशुवर्मणः 'शब्दविद्या' इति मन्यते। तेन पाणिनीयं व्याकरणमाश्रित्य सा रचिता आसीदिति श्रूयते । अस्य समुल्लेखः चीनदेशीयेन यात्रिणा ह्वेन साङ् इत्यनेन लिखिते यात्रावृत्तान्ते प्राप्यत इति नैपाला ऐतिह्यविदो भाषन्ते। परं तथाविधो व्याकरणग्रन्थः कीदृगासीदिति ग्रन्थाभावादिदमित्थं वक्तुमशक्यम्। यत्किमपि स्यात्, तदानीं व्याकरणग्रन्थविवृत्यादीनि विरच्यन्ते स्म, पाणिनीयव्याकरणस्य संस्कृतवाङ्मयस्य च पठनपाठने सम्यक् प्रचलतः स्म, राजभवने शास्त्रार्थश्च नियमितं भवति स्म, तात्कालिकाः राजानश्च संस्कृतपण्डितान् स्मारं स्मारं पुरस्कुर्वन्ति स्मेति अनेकैरभिलेखैः, वंशावलीभिरन्यसाक्ष्यैश्च स्पष्टीभवति, एतादृशैः वाङ्मयविकाससम्बद्धैरनेकैः कार्यैः लिच्छविकालः संस्कृतविद्यायाः स्वर्णकालो मन्यते । सा च संस्कृतविद्या पाणिनीये व्याकरणे समाश्रिता आसीदिति तदानीं समुपलब्धैः पाणिनीयव्याकरणनिष्ठैः शताधिकैरभिलेखैः प्रमाणितं भवति। तदानीमेव चन्द्रगोमीनाम्ना केनचिद् विदुषा *चान्द्रव्याकरणम्* रचितं दृश्यते स च वैयाकरणो नैपालो विद्वानासीदिति बहव ऐतिह्यविद आमनन्ति। तदुपरि सुमतिनामकस्य वृत्तिकारस्य 'सुमतिपञ्जिका', पूर्णचन्द्रनामकस्य वृत्तिकारस्य 'शब्दलक्षणविववरणपञ्जिका' तथा रत्नमतिनामकस्य वृत्तिकारस्य 'चन्द्रव्याकरणपञ्जिका' इति टीकात्रयं प्राप्यते। तदनु उमानाथार्यालस्य ग्रन्थत्रयं- सारकौमुदी, वामनकौमुदी तथा लघुशब्देन्दुशेखरविवृतिरिति आयाति। ततश्च पाल्पाधिपतेः पृथ्वीपालसेनस्य प्रासादकौमुदी, मल्लकालिकस्य कवेर्वैयाकरणस्य च लक्ष्मणकवेः कवितानिकषोपलः (व्याकरणविषयसम्बद्धं काव्यम्), नीलदेवस्य अष्टाध्याय्या लक्ष्यनिर्देशिका टीका प्रभृतीनि व्याख्यानानि ग्रन्थाश्च पाणिनीयव्याकरणविस्तारे समायान्ति। तदनु समायाता 'सुकृतिदत्तपन्तः' इति नामकस्य विदुषः 'वृद्ध्यादिसूत्राष्टकविवृतिः' बृहती व्याख्या मन्यते। तदनु प्रकृतेनैव व्याख्यात्रा लघुशब्देन्दुशेखरोपरि परिभाषेन्दुशेखरोपरि च टीका लिखितेति ज्ञायते। यद्यप्यद्यावधौ एतद् व्याख्यानत्रयमप्रकाशितमेव तथाप्येतद् यथोपलब्धं विद्वत्तापूर्णं प्राचीनतरञ्च व्याख्यानं मन्यते। तदनु पाणिनीये व्याकरणेऽनेकानि व्याख्यानानि रचितानि। परं तेषु प्रौढं तु सोमनाथसिग्द्यालस्य 'प्रतिसंस्कृतासिद्धान्तकौमुदी' इति मन्यते । प्रक्रियाक्रमेण व्याख्यातेनानेन ग्रन्थेन श्रीमतो भट्टोजिदीक्षितस्य सिद्धान्तकौमुदी परिष्कृतेति महत् स्थानमस्य। पाणिनीयसूत्रव्याख्यानक्रमे नैपालैस्तृतीयप्रकारकैर्ग्रन्थैः सूत्रप्रक्रियाक्रमयोः सङ्गमोऽपि व्यधायि। तादृशव्याख्यानग्रन्थो हरिप्रसादशर्माचार्यस्य 'अष्टाध्यायीशारदाप्रभाटीका' वर्तते। एतद् व्याख्यानं प्रारम्भिकेभ्यो व्याकरणपिपठीषुभ्यः प्रक्रियाक्रमेण तदुत्तरवर्त्तिभ्यस्तु सूत्रक्रमेण पाठनाय द्विधा विभज्य रचितमिति क्रमद्वयस्य सङ्गमोऽस्य वैशिष्ट्यं तृतीयप्रकारश्च। एवमेव पद्यमाध्यमेन विन्यस्तानि

सुरेशझानामकस्य विदुषः 'श्लोकसिद्धान्तकौमुदी'प्रभृतीनि व्याख्यानान्यपि नेपालदेशत एव रचितानि वर्तन्ते । एवमेव लोकमणिदाहाल-गोविन्दसापकोटा-शिवराजकौडिन्यायन-टीकारामपन्थी-रामचन्द्र-पौडेलप्रभृतिभिरैतिह्यान्वेषकैः पाणिनीयव्याकरणसम्बद्ध ऐतिह्ये लघुग्रन्था विरचिता वर्तन्ते। एतेभ्यः प्राक्तनाः द्विशतवर्षसन्निकटा दशाधिका वैयाकरणा अनुसन्धातारश्च पाणिनीयं व्याकरणम्, तट्टीकाम्, तदैतिह्यम्, तत्परिशीलनञ्चाश्रित्य नैकानि ग्रन्थरत्नानि रचयामासुः। तेषु छविलालपोखरेलस्य कौमुदीसारः, शिवराजकौडिन्यायनस्य अष्टाध्यायीगणपाठादिस्तथा लोकमणिदाहालस्य अष्टाध्याय्या लघुवृत्तिरिति मुख्यानि सन्ति। एतेषु कतिपये ग्रन्था अद्यपर्यन्तं सङ्ग्रहालय एव गुम्फिता दृश्यन्ते। पाणिनीयव्याकरणविस्तारे नेपालदेशीयैर्विद्वद्भिर्नेपालसंस्कृतविश्वविद्यालयतो भारतादिषु देशेषु स्थितेभ्यो नैकेभ्यो विश्वविद्यालयेभ्यश्च विद्यावारिधिरुपाधिलाभक्रमे स्वकीयगवेषणप्रकाशनक्रमे च नैकविधानि ग्रन्थरत्नानि विरचय्य पाणिनीयव्याकरणोपरि महान्ति कार्याणि कृतानि। तथैव पाणिनीयव्याकरणसम्बद्धानि पञ्चाशदधिकानि लघुपुस्तकानि, पारेशतं लघुलेखाश्च नैपालैर्विद्वद्भी रचिता दृश्यन्ते। एवमेव नैपालैर्द्विशताधिकैर्गुरुकुलैः, शताधिकैः संस्कृतमाध्यमिकविद्यालयैस्तथा नेपालसंस्कृतविश्वविद्यालयेन पाणिनीयव्याकरणस्य प्रक्रियाग्रन्थास्तेषां व्याख्यानानि च पाठ्यसामग्रीत्वेन निर्धार्य प्रत्यक्षतोऽध्याप्यन्ते। तेनैव प्रकारेण नेपालीमैथिल्यवधिभोजपुरीप्रभृतिभाषानिबद्धं व्याकरणमपि प्रत्यक्षाप्रत्यक्षतो पाणिनीये व्याकरण एव आश्रितमस्तीति पाणिनीयव्याकरणव्याख्यानाय, विस्ताराय, प्रवर्द्धनाय च नैपालविदुषा नेपालदेशेन च महद्योगदानं कृतं दृश्यते।

नेपाले पाणिनीयव्याकरणस्य प्रयोगः, तस्य पठनपाठने, तमधिकृत्य ग्रन्थव्याख्यानटिप्पणादिलेखनम्, तदनुसारेण शिलाताम्रकर्गजादिष्वभिलेखनिर्माणञ्च लिच्छविकालतोऽद्यावधिर्निरवच्छिन्नतया जातो जायमानश्च दृश्यते । नेपालदेशीयेन सर्वकारेण, संस्कृतनिकायेन, संस्कृतविद्यालयगुरुकुलादिभिः, संस्कृतविश्वविद्यालयेन स्वतन्त्रैर्विद्वद्भिश्चानेकेषु कार्येषु पृथक्तया कृतेष्वपि तेषां सर्वेषामेकीकृतं प्रामाणिकञ्च वस्तुतथ्यात्मकं विवरणमद्यावधौ कुत्रापि न प्राप्यते। अतो नेपालतो पाणिनीयव्याकरणसम्बद्धाः कीयन्तो ग्रन्था अभिलेखादयश्च सार्वजनिकीभूता इति विषयस्याज्ञानं जटिला समस्या। पुनश्च तथाविधा अभिलेखग्रन्थादयो लोकं प्राज्ञिकक्षेत्रं वा कथं किञ्चोपकरिष्यन्तीत्यपि न ज्ञायते। अत एतादृशीनां समस्यानां समाधानाय निम्नाङ्कितान् प्राविधिकशोधप्रश्नान् समाश्रित्य शोधोऽयं प्रकल्प्यते

## शोधप्रश्नाः

प्रकृतलेखो निम्नाङ्कितेषु शोधप्रश्नेषु केन्द्रितो वर्तते-

क) पाणिनीयव्याकरणविस्तारे नेपालदेशेन किमवदानं कृतम् ?

ख) नेपालदेशेन तथाविधमवदानं कृतमिति कथं ज्ञायते ?

ग) तथाविधस्यावदानस्य किं मूल्यम् ?

## शोधोद्देश्यानि

प्रकृतलेखो निम्नाङ्कितेषूद्देश्येषु केन्द्रितो वर्तते-

क) पाणिनीयव्याकरणविस्तारे नेपालदेशेन कृतस्यावदानस्य वर्णनम्।

ख) नेपालदेशेन कृतस्यावदानस्य प्रक्रियासमुल्लेखः।

ग) तथाविधस्यावदानस्य मूल्यनिर्धारणम्।

## अध्ययनविधिः

प्रकृतः शोधलेखो मूलतः परम्परिते पुस्तकालये तथा वैद्युतपुस्तकालये चाश्रितो वर्तते। यद्यप्यत्र शिलाताम्रकर्गजप्रभृतयो बहुविधा अभिलेखा गृहीताः सन्ति तथापि तादृश्यः सर्वाः सामग्र्यः पुस्तकमाध्यमेन गृहीताः सन्तीति हेतोस्तानि द्वितीयकस्रोतांसि वर्तन्ते। इतोऽन्याः सामग्र्योऽपि वैद्युतपुस्तकालयतः परम्परितपुस्तकालयतश्च सङ्कलय्यात्र विवरणत्वेन प्रस्तुताः सन्ति। कालक्रमेण सङ्कलितसामग्रीणां विवरणं प्रदाय तेषां सामान्यतो वर्णनविश्लेषणादिकं विधीयते। तादृशीनां सामग्रीणां वर्णने विश्लेषणे च मूलतो वर्णनविश्लेषणव्याख्यादीन् विधीन् प्रयुज्य तस्माद् वस्तुतथ्यात्मको निष्कर्षो निष्पादितोऽस्ति, अतोऽयं मूलतो विवरणसङ्कलने केन्द्रितो गुणात्मकः शोधः सञ्जातोऽस्ति। अमुत्र सामग्रीविश्लेषणस्य क्रमः प्रायो निगमनात्मको वर्तते। सन्दर्भाङ्कने सन्दर्भसामग्रीसूचीनां समुल्लेखने चात्र लेखकमितिपद्धतिः (APA 7th ed.) प्रयुज्यते । तथापि संस्कृतभाषासम्बद्धानां श्लोकसूत्रकारिकादीनां समुद्धरणे कतिषु स्थानेषु संस्कृतस्य परम्परिता पद्धतिरपि प्रयुज्यते।

## व्याख्यानखण्डः

### पाणिनीयव्याकरणव्याख्याने लिच्छविराजानामवदानम्

नेपालदेशस्यास्तित्वं नाम्नः समुल्लेखश्च यद्यपि गोपालवंशतो महिषपालवंशतश्च श्रूयते तथापि तदानीं पाणिनीयव्याकरणोपरि सम्पादितानां कार्याणां लिखितविवरणाप्रापणेन तद्विषय इदमित्थं कर्तुं न शक्यते, अतो नेपाले पाणिनीयव्याकरणस्य विकासो विस्तारश्च प्राचीनान्तर्गताद् लिच्छविकालादभूदिति निश्चीयते। लिच्छविवंशे समुद्भूतो धर्मदेवपुत्रो मानदेवः ५२१ तमे विक्रमे काष्ठमण्डपस्य निकटस्थे चाँगुनारायणाभिधेये स्थानेऽन्यत्र चानेकान् शिलालेखान् सुललितसंस्कृतगिरा उट्टङ्कयामास। तेन संस्थापित एकस्मिन् शिलालेखे

नेपालस्य समुल्लेखः प्रथमबारं जातमिति ऐतिह्यविद आमनन्ति। स चाभिलेखः पाणिनीयव्याकरणानुशासने संस्कृतभाषायां निबद्धो वर्तते, एवम्-

तस्याप्युत्तमधर्मकर्मयशसः पुत्रोऽर्थविद्धार्मिकः।

कर्मज्ञो विनयेप्सुरुत्तमगुणः श्रीधर्मदेवो नृपः ।।

धर्मेणैव कुलक्रमागतमपान्नेपालराज्यं महत् ।

स्फीतीकृत्य नवैर्नृपर्षिचरितैः सम्भाव्यचेतो नृणाम् ।। (वज्राचार्यः [सङ्कलकः], २०३०, पृ.११)।

शङ्करदेवपुत्रेण दण्डनीतिविज्ञेन, धर्मात्मना, अनुशासनप्रियेण च राज्ञा धर्मदेवेन कुलक्रमशासनानुगतो नेपालदेशोऽयं रक्षित इति अस्याभिलेखस्याशयः। राज्ञा मानदेवेनैव राजनीतिक्षेत्रे समाजेऽन्यत्र च प्रयुज्यमानाः अनेके शब्दाः पाणिनीयव्याकरणानुसारेण निर्मिता आसन्निति तात्कालिकानामभिलेखानामध्ययनेन बुध्यते, यथा- विक्रान्तविष्णुमूर्तिः, गरुडध्वजः, श्रीवत्सचिह्नः, दोलाद्रिः, यूपग्रामः, व्यायामसङ्क्षेपकृत्, सुगतशासनपक्षपाती, सतीव्रतः, मानाङ्कमुद्रा, भट्टाधिकरणः, श्रीपाद इति प्रभृतयः। एतादृशानि पदानि समस्तशब्दाँश्च पाणिनीयव्याकरणानुसारेण साधयितुं शक्यन्ते, अतो लिच्छविकाले पाणिनीयव्याकरणस्य प्रचुरविस्तारविकासावभूतामिति ज्ञायते।

लिच्छविकाले रचितं प्रथमं संस्कृतव्याकरणं लिच्छविनृपतेरंशुवर्मणः (शासनकालः ई. सं.६०५-६२१) 'शब्दविद्या' इति बहुभिरैतिह्यविद्भिः कथ्यते। तेन पाणिनीयं व्याकरणमाश्रित्य एतन्नामकः कश्चिद् व्याकरणग्रन्थो व्यरचीति श्रूयते। परमद्यावधौ तस्यानुपलब्धेः स ग्रन्थः कीदृगासीदिति इदमित्थं कर्तुमशक्यम्। व्याकरणग्रन्थस्याप्राप्तावपि तस्मिन् विषये गोपालवंशावलिकारेण- 'व्याकरणादिशास्त्रचर्चता प्रवर्तते' इत्युल्लेखनाद् अस्य नृपतेर्वैयाकरणत्वम्, व्याकरणशास्त्रस्य पठनपाठनव्यवस्थापकत्वञ्च स्पष्टीभवति। अस्य सम्पुष्टिरंशुवर्मणो विशेषणे- श्रीकलहाभिमानी, श्रीमहासामन्तः, भगवत्पशुपतिपादानुध्यातः इति प्रभृतीनां पदानां प्रयोगेण पुष्यते। एकोऽभिलेखस्तद्विषये प्राह-

प्रजाहितार्थोद्यतशुद्धचेतसांऽशुवर्मणा श्रीकलहाभिमानिना ।

कथं प्रजा मे सुखिता भवेदिति प्रियव्यवस्थेयमकारि धीमता (बज्राचार्यः [सङ्कलकः], २०३०, पृ.३३२)।

'कर्कप्याट्रिक'नामा कश्चिद् बेलायतदेशीयभाषाविद् अंशुवर्मकाल एव नेपालदेशे सम्प्राप्त आसीत् । तदानीं नैपालैर्भक्तपुरमण्डलवर्त्तिभिः पण्डितैरेकं नैपालं व्याकरणं तस्मै प्रदर्शितमासीदिति कर्कप्याट्रिकस्य पुस्तकमुद्धरन् नैपाल ऐतिह्यविद् सूचयति (बज्राचार्यः, २०३०, पृ.३९६) । अंशुवर्मणः पूर्ववर्त्तिना मानदेवनामकेन नृपतिना तत्पूर्ववर्त्तिभिरन्यैर्नृपतिभिश्च पाणिनीयं व्याकरणमेव पठनपाठनार्थं

सञ्चालितमासीदिति तदानीं शिलाताम्रादिषु पाणिनीयव्याकरणानुसारमुट्टङ्कितैः संस्कृतभाषानिबद्धैः शिलालेखैः प्रमाणितं भवति । मानदेवस्य पितरि धर्मदेवे दिवङ्गते तस्याः पत्नी राज्यवती व्याकूलीभूय सतीत्वं याचितवती, तच्छ्रूयमाणो व्याकुलः पुत्रो मानदेवो नानाविधैरुपायैर्मातरं शमितवान् । स एव नृपतिरद्य जगतं प्रह्लादयतीति कवितेयं वर्णयति, एवम्-

देवी राज्यवती तु तस्य नृपतेर्भार्याभिधाना सती ।
श्रीरेवानुगता भविष्यति तदा लोकान्तरासङ्गिनी ।।
यस्याञ्जात इहानवद्यचरितः श्रीमानदेवो नृपः ।
कान्त्या शारदचन्द्रमा इव जगत्प्रह्लादयन्सर्वदा (वज्राचार्यः [सङ्कलकः], २०३०, पृ.११)।

लिच्छविकालः संस्कृतभाषावाङ्मयस्य विकासे स्वर्णकालो मन्यते । तदानीं संस्कृतभाषायाः प्रचुरविकासो जातो आसीदिति तदा यत्रतत्र समुत्कीर्णैः शताधिकैः संस्कृतशिलालेखैर्ज्ञायते। तावता अद्यावधौ नेपालीपालिप्रभृतिषु भाषासु नैकेषु विकारेषु सम्प्राप्तेष्वपि संस्कृते किञ्चिदपि विकारो न दृश्यत इति उपरिष्टात् स्थितेन वाक्यसङ्गठनेन बुध्यते। पुनश्च तदा प्रयुक्तं संस्कृतमपि पाणिनीयव्याकरणेनानुशासितमासीदिति तात्कालिकेन भाषास्वरूपेण स्पष्टतोऽवबुध्यते। एतेन पाणिनीयव्याकरणाध्ययनस्य सुदीर्घपरम्परा नेपाले प्रवर्तिता आसीदिति निश्चीयते। मानदेवात् पश्चभवेन लिच्छविनृपतिनांशुवर्मणा अपि नैकेषु स्थानेषु संस्कृतशिलालेखा उट्टङ्कयिता दृश्यन्ते। काष्ठमण्डपे विराजितस्य भगवतो चाँगुनारायणस्य मन्दिरे कैश्चित् पूर्वजैर्विन्यस्तं सुवर्णपत्रं गरुडचिह्नं च कालान्तरेण जीर्णत्वं भग्नत्वं च समापन्नेंऽशुवर्मा नामा नृपतिः संचस्कृवान् इति तात्कालिकः कश्चित् कविः सुललितसंस्कृतगिरा एवं वर्णयति-

कालेन शीर्णमवलोक्य समस्तमाद्यम् ।
हैमं हरेर्भगवतः कवचं सतार्क्ष्यम् ।।
तस्मान्निदर्शनमवाप्य जगद्धितार्थम्।
संचस्कृवान्नरपतिः पुनरंशुवर्मा ।। (वज्राचार्यः [सङ्कलकः], २०३०, पृ.३१७) ।

अंशुवर्मणः काल एव चन्द्रवर्मगोमि-नामा कश्चिद् सामन्त आसीत् स च नृपतेः प्रशासकत्वेन कार्यं कुरुते स्म, तेन पाणिनीयं व्याकरणमाश्रित्य ‘चान्द्रव्याकरण’नामकं व्याकरणमेकं रचितमासीदिति काष्ठमण्डपनिकटस्थे ‘भेल्बू’ इति नामके स्थान उट्टङ्कितेन लिच्छविकालिकेनाभिलेखेन ज्ञायते। एतावतश्चान्द्रव्याकरणस्य रचनांशुवर्मकाले नेपालदेश एवाभूयत इति ज्ञायते। अस्य व्याकरणस्य दशाधिकाः पाण्डुलिपयष्टीकाग्रन्थाश्च नैपालस्थेषु विभिन्नेष्वभिलेखालयेषु प्राप्यन्ते । ताश्चांशुवर्मण उत्तरकालेऽपि भिन्नभिन्नैरक्षरैः देवनागरिलिपिना

सह लिच्छविलिपिनापि लेखनादस्य रचना प्रयोगश्च नेपालभूमावेवाभूदिति निश्चीयते (वज्राचार्यः, २०३०, पृ.३९६)। चान्द्रव्याकरणोपरि 'सुमतिः' इति नामकस्य वृत्तिकारस्य 'सुमतिपञ्जिका', पूर्णचन्द्रनामकस्य वृत्तिकारस्य 'शब्दलक्षणविववरणपञ्जिका', रत्नमतिनामकस्य वृत्तिकारस्य 'चन्द्रव्याकरणपञ्जिका' तथाज्ञातवृत्तिकारस्याज्ञाताष्टीकाः लिखिता आसन्निति सुमितिटीकोपरि कृतविद्यावारिधिको नैपालो विद्वान् तिमिल्सिना (ई.२०२२) सूचयति। अंशुवर्मणो देहावसानस्य कीयत्कालानन्तरं (वैक्रमस्य सप्तमशतके) नेपालभ्रमणक्रमे काष्ठमण्डपे सम्प्राप्तश्चीनदेशीयो यात्री ह्वेनसाङः (Xuanzang) स्वयात्रावर्णने नैपालभाषावाङ्मययोश्चर्चा- प्रसङ्गेंऽशुवर्मा–नामको नृपतिः 'शब्दविद्या' नामकं व्याकरणग्रन्थं लिलेख इत्याहेति यात्रिणमुद्धरन् नैपाल ऐतिह्यविद् वज्राचार्यः सङ्केतयति (वज्राचार्यः, २०३०, पृ.३९६)। परमन्यत्र शब्दविद्यायाश्चर्चाऽविद्यमानात् तस्मिन् समय एव चान्द्रव्याकरणस्य रचनाच्च पूर्वोक्तं भिन्ननामाङ्कितं व्याकरणद्वयमेकमेव भवितुमर्हतीति उत्तरवर्त्तिन अनुमिन्वन्ति। नैपालेन लिच्छविकालिकेन राज्ञा अंशुवर्मणा चान्द्रव्याकरणरचनाय चन्द्रगोमिनामकः कश्चिद् बौद्धो विद्वाननुरुद्ध आसीदिति आत्रेयः (२०७६) एकस्मिन् लेखे ह्वेनसाङ इत्यस्य यात्रावृत्तान्तमुद्धरन् सूचयति (पृ.१६)। एतैः प्रमाणैः लिच्छविकाले पाणिनीयव्याकरणस्य पठनपाठने तद्विषये टीकादिरचनञ्च प्राचुर्येण जातमासीत्, तमेव व्याकरणमाश्रित्य चान्द्रव्याकरणं तदुपरि टीकाश्च रचिता आसन्निति चान्द्रव्याकरणकारेण रचितैः सूत्रवार्तिकादिभिः स्पष्टीभवति (चन्द्रगोमी, [सम्पा.फतहसिंहः] ई. १९६७, पृ. २-१०)। तदनन्तरं पाणिनीयव्याकरणस्य विस्ताराय मल्लकालं यावत् के के ग्रन्था वृत्तयश्च रचितेति स्पष्टतया वक्तुं न पार्यते।

**पाणिनीयव्याकरणव्याख्याने मल्लराजानामवदानम्**

ऐतिह्यविद्भिर्मध्यकालस्य स्थितिर्विक्रमस्य दशम-ऊनविंशतमशतक- (वि.सं. ९००-१८९९) मध्ये निर्धार्यते। एतन्मध्ये शाहवंशीयैर्मल्लवंशीयैश्च शासकैर्नेपालो बहुधा शासितः। पृथ्वीनारायणशाहनामकस्य नृपतेः शासनपूर्वं वर्तमानो नेपालो द्वाविंशति-चतर्विंशत्यादिष्वनेकेषु राज्येषु विभक्त आसीदित्यैतिह्यावलोकनेन ज्ञायते। तदानीं पाणिनीयव्याकरणस्य पठनपाठनयोः, तद्विषये ग्रन्थलेखनादिषु च कानि कानि कार्याणि जातानीति स्पष्टतया वक्तुं न शक्यते । तथापि मध्यकालिकेष्वभिलेखेष्ववलोकितेषु सत्सु प्रताप-श्रीनिवास–विष्णु-जयप्रकाश-योगनरेन्द्र-सिद्धिनरसिंहप्रभृतिभिरनेकैर्नृपतिभिः पाणिनीयव्याकरणानुसारिणा सुललितसंस्कृतपद्यमाध्यमेन सामाजिकसांस्कृतिकैतिह्यादिविषयाः शिलालेखादिषु समुट्टङ्किताः सन्ति। प्रायो राज्ञां प्रशस्तिषु, तात्कालिकस्थितिवर्णनेषु, स्थानीयानां देवीदेवतानां स्तुतिगानेषु च केन्द्रितेषु तथाविधेषु शिलालेखेषु क्वचित् पाणिनीयव्याकरणसौन्दर्यमपि स्फुटं प्रतिपादितं दृश्यते ।

यद्यपि काष्ठमण्डपोपत्यकाद् बहिरपि मल्लराज्ञां सामान्यप्रभावो दृश्यते तथापि तैः प्रशासिता भूमिः मुख्यतः काष्ठमण्डपमिति सकला ऐतिह्यविद आमनन्ति। एकीकरणात् पूर्ववर्त्तिनि मध्यकाले तैर्भक्तपुरम्, ललितपुरं कीर्तिपुरञ्च प्रशासितमासीदिति ऐतिह्यावलोकनेन ज्ञायते। तादृशेषु नैकेषु राजसु प्रताप-श्रीनिवास–विष्णु-जयप्रकाश-योगनरेन्द्र-सिद्धिनरसिंहादयः संस्कृतप्रिया दृश्यन्ते । प्रतापमल्लस्तु कविषूत्तमो नृप आसीदिति महेन्द्रोदयमहाकाव्यस्य रचयिता भरतराजमन्थलीयः स्वकीये महाकाव्ये सुललितगिरा वर्णयति, एवम्- प्रतापमल्लो कविषूत्तमो नृपो लिलेख काव्यानि बहूनि कोविदः ...। एतैः राजभिः तात्कालिकैरन्यैर्विद्वद्भिश्च संस्थापितेषु तदानीन्तनेषु शिलालेखेषु कीदृशी संस्कृतभाषा आसीत्, पाणिनीयव्याकरणस्य प्रयोगश्च कथमभूदिति ज्ञानाय केषाञ्चन शिलालेखानामुद्धरणं तत्रत्यव्याकरणप्रयोगस्य निभालनञ्चाधः क्रमशो विधीयते।

विक्रमस्य १७६२ तमे वर्षे काष्ठमण्डपनिकटस्थे चापागाउँनामके स्थाने हरिशङ्करभट्टनामकेन विदुषा शिवमन्दिरं निर्माय तच्छिरः सुवर्णच्छदेन छादयित्वा तद्द्वारे एतादृशी कविता उट्टङ्किता-

यस्योच्चैः कलशायते दिनकरश्चन्द्रोऽपि छत्रायते ।
कस्तूरि तिलकायते जलधरो मालायते स्वर्धुनी ।।
तारासिद्धवधूविकीर्णविकशल्लाजायते राजते ।
प्रासादोऽयमहो अहो [इति ब्रुवन् लोकः सुपुष्पायते]।। (वज्राचार्यः [सङ्कलकः], २०५६, पृ.३५४) ।

हरिभट्टेन निर्मितं मन्दिरं प्रासादाकारकमस्ति, तत्स्वरूपञ्च सुन्दरं भव्यं दिव्यञ्च वर्तत इति वर्णयता कविनात्र उपमेयभूतः मन्दिरप्रासादोऽयमनेकैरूपमानैः सह तुलितो वर्तते । तत्क्रमे कविः प्राह- मन्दिरस्यौच्चैः दिनकरः कलशमिव, चन्द्रः छत्रमिव, मेघः कस्तूरिटीकामिव, आकाशगङ्गा मालामिव, तारासिद्धवध्वो विकीर्णलाजापुष्पमिव तथा लोकश्च विकसत् पुष्पमिव राजते तादृशोऽयं मन्दिरप्रासादोऽतिसुन्दरो वर्तत इति कविताया आशयो विद्यते । एतस्मिन् वर्णनेऽत्र नामधातोः सुन्दरप्रयोगः कविना विहितोऽस्ति। अतः मल्लकालेऽपि पाणिनीयव्याकरणस्य सुष्ठुप्रयोग न्यवर्तत इति निश्चीयते।

प्राचीनकाले प्रकाशनव्यवस्थाया अभावात् पुस्तकप्रकाशनं न भवति स्म, अतो येऽभिलेखाः समुपलब्धाः त एव भाषासाहित्यादीनां व्याकरशास्त्रस्य च सम्पत्तिर्भवति स्म। मध्यकालतः पूर्वं संस्कृते पाल्यादिषु चानेका ग्रन्थाकारकाः कृतयः लिखितास्वापि ताः सुलभतया न प्राप्यन्ते स्मेति ऐतिह्यभाण्डागाराणामवलोकनेन ज्ञायते। अतः पाणिनीयव्याकरणविकासे विस्तारे च काः काः कृतयो व्याख्याश्च लिखिता आसन्निति बोद्धुमभिलेखालये स्थितानां पाण्डुलिपीनां शिलालेखादीनामेव शरणमाधारो मन्तव्यः । तादृशशिलालेखेषु

१७८९ तमे विक्रमे काष्ठमण्डपनिकटस्थे शङ्खमूलनामके स्थाने तात्कालिकेन नृपतिना विष्णुमल्ल इति नामधेयेन वाग्मतीनद्या महत्त्ववर्णनेन स्थापितमप्येकम्। अत्रत्या स्त्रीलिङ्गप्रधाना पाणिनीयव्याकरणसम्मता च भाषा शोभना दृश्यते–

स्नातुर्जन्मनिवारिणी जडधियां जाड्यौघविध्वंसिनी ।
मृत्कन्दर्पविदारिणी हरमुखाज्जाता जगत्पावनी ।।
चञ्चत्कोटितरङ्गिणी मणिमती सङ्गम्य संवाहिनी ।
सेयं ब्रह्मसरस्वती विजयते गङ्गोपमा वाग्मती।। (वज्राचार्यः [सङ्कलकः], २०५६, पृ.४३२) ।

अत्र वाग्मतीनद्यास्स्त्रीत्वाधायकानि विशेषणानि सम्यक्तया प्रस्तुतानि सन्ति । तत्क्रमे कविना सौन्दर्यपूर्णया सुललितया भाषया तस्या वर्णनं कृतमस्तीति कविताया अवलोकनेन बुध्यते । अनेन तात्कालिका नैपालाः कवयः पाणिनीयं व्याकरणं सम्यग् जानन्ति कवितादिषु च सुप्रयोगमपि कुर्वन्ति स्मेति स्पष्टीभवति । तात्कालिका नागरिका एव न अपितु राजानोऽपि संस्कृतव्याकरणकोषसङ्गीतादिषु पारङ्गता आसन्निति काष्ठमण्डपनिकटे कीर्तिपुरनगरे सिंहदुवालस्थे नारायणमन्दिरस्याग्रभागे १७४१ तमे वैक्रमे श्रीनिवासमल्लपुत्रेण योगनरेन्द्रमल्लनाकेन नृपतिना संस्थापिते शिलालेखे प्रयुक्तया भाषया प्रमाणितो भवति, यथा- श्रीमत् श्रीललितापुरी श्रीमानिगलाधिपतिः महाराजाधिराजश्रीश्री जयश्री निवासमल्लदेवः तत्पुत्रः सकलनीतिशास्त्रकाव्यव्याकरणकोषालङ्कारसङ्गीतादिकुशलः राजाराजेन्द्रः श्रीश्रीयोगनरेन्द्रमल्लदेवः प्रभुछत्रधारी...(वज्राचार्यः [सङ्कलकः], २०५६, पृ.५३१-५३२)। एतेनाभिलेखेन तदानीन्तनः राजा योगनरेन्द्रमल्लो व्याकरणशास्त्रे कुशल आसीदिति स्पष्टीभवति । श्रीनिवासमल्लनामा नृपो व्याकरणादिषु पारङ्गत आसीदिति द्वितीयोऽभिलेखोऽपि प्रमाणीकुरुते । तेन काष्ठमण्डपनिकटस्य कीर्तिपुरस्य चिलंचोचैत्यनिकटे १७२६ तमे वैक्रमे संस्थापिते धर्मधातुमण्डलनामकेऽभिलेखेऽपि तस्य व्याकरणसङ्गीतादिषु कुशलत्वं स्पष्टीकृतमस्ति, यथा-ललितपुरमानिगलाधिपतिः सकलनीतिशास्त्रविद्याकाव्यव्याकरणादि-कोषालङ्कारकलासु पारगः... महाराजाधिराजः श्रीश्रीश्रीनिवासमल्लदेवस्य विजयराज्यसमये श्रीकीर्तिपुरीदेशे... (वज्राचार्यः [सङ्कलकः], २०५६, पृ.५६९)। यद्यप्यत्रत्येऽभिलेखद्वये स कस्मिन् व्याकरणे निपुण आसीदिति स्पष्टतया समुल्लिखितो नास्ति तथापि व्यवहारतः पाणिनीये व्याकरण एव इति वक्तुं शक्यते। पुत्रो योगनरेन्द्रमल्ल एव न अपितु तत्पिता राजा श्रीनिवासमल्लोऽपि सङ्गीतविद्यादिषु निपुण आसीदिति अधःस्थितेयं कविता स्पष्टयति, यथा-

नानानृत्यकलाविलासरसिकः कन्दर्पवत्सुन्दरः।

वीणातालमृदङ्गगीतनिपुणः सङ्गीतविद्यानिधिः ।।

भास्वद् भानुनिभः प्रतापनिहतः प्रोद्यत्प्रतीपद्युतिः ।

नेपाले ललितापुरे विहरति श्रीश्रीनिवासो नृपः ।।

एतासु कवितासु विशेषणविशेष्ययोः सङ्गतिः, समासः, भाषिकसौष्ठवम्, लिङ्गवचनादीनां सङ्गतिश्च सुसन्तुलिता दृश्यते। वाक्यविन्यासोऽपि पाणिनीयव्याकरणनियमतो जातो दृश्यते, अतो मल्लकाले पाणिनीयव्याकरणस्य पठनपाठने सुव्यवस्थित आसीदिति निर्णीयते। असावेव न ललितपुरस्यापरराजा सिद्धिनरसिंहमल्लोऽपि संस्कृतवाङ्मयेषु निपुण आसीदिति तेन तत्रत्ये मङ्गलबजारस्थिते श्रीकृष्णमन्दिरे समुपन्यस्तेन षट्पञ्चाशत् पद्यात्मकशिलालेखेन प्रमाणितं भवति । तस्यैकं पद्यमेवमस्ति-

प्रातिष्ठा च युधिष्ठिराधिकतरा निष्ठा वशिष्ठाधिका ।

कीर्तिः कार्तिककृत्तिकापतिमतिस्तस्याधिका वर्तते ।।

वाणी व्याससमा रमा स्थिरतमा रामाभिरामा कृतिः ।

श्रीमत्सिद्धिनृसिंहमल्लनृपतेः किन्नाम यन्नाद्भुतम् ।। (वज्राचार्यः [सङ्कलकः], २०५६, पृ.७४-७५)।

प्रकृते शिलालेखे यद्यपि लेखनकालः स्पष्टो नास्ति तथापि पूर्वोत्तरशिलालेखैः सह समन्विते सति विक्रमस्य १६९२-१६९५ मध्येऽयं संन्यस्तो भवेदिति निश्चीयते। अत्र ललितपुरनगर्याः तात्कालिकस्य नृपतेः सिद्धिनरसिंहमल्लस्य यशोगानं स्पष्टतया वर्णितमस्ति । एतत्क्रमे पाणिनीयव्याकरणसम्मता परिष्कृता प्रसादशैलीमयी भाषा विन्यस्ता दृश्यते ।

मल्लकाले जातोऽपरः प्रसिद्धः राजा प्रतापमल्लः मन्यते । अनेन राज्यसञ्चालनक्रमे संस्कृतवाङ्मयस्य विकासाय नैकानि कार्याणि कृतानीति ऐतिह्यविद कथयन्ति। ऐतिह्यविद् जगदीशचन्द्ररेग्मी तु अनेन राज्ञा नवत्यधिका अभिलेखाः संस्थापिता इत्याह, तेषु पञ्चाभिलेखानां चर्चा तेन कृता वर्तते (रेग्मी, २०२७, पृ.२५-३८)। विक्रमस्य १६९८-१७३१ मध्ये कान्तिपुरनगर्याः शासकत्वेन स्थितोऽसौ राजा स्वं कवीन्द्र इति पदेनोद्घोषयामास । संस्कृतवाङ्मयसम्बद्धा नैकाः कृतयो लिलेख। स सुललितकविरासीदित्यनेन रचितया प्रकृतकवितया स्पष्टीभवति-

नेपालमण्डनमनोहरमण्डना या

श्रीमत्पुरी पशुपतेः पशुपाशहर्तुः ।।

श्रीवाग्मती सुरधुनीव धुनोति पापम् ।

यत्रास्तु सा सकलमङ्गलदा नराणाम् ।। (रेग्मी, २०२७, पृ.३७)

यत्र पशुपतिनाथो मङ्गलदायको वर्तते, सः वाग्मतीनद्या पवित्रीकृतः पाशुपतक्षेत्रः नेपालं रारक्षतीति कविताया आशयः। अत्र सुसरलया पाणिनीयव्याकरणसम्मतया च भाषया काष्ठमण्डपस्य वर्णनं कृतं प्राप्यते। अपरो कश्चित् कविः प्रतापमल्लनामकं राजानं सुललितया सुमधुरया च गिरा प्रशंसते, एवम्-

नानार्थशास्त्रसकलार्थकलाकलापी ।
श्रीमत्प्रतापनृपतिर्धरणीकवीन्द्रः ।।
सम्यक् प्रशासतितरां विनयेन नीत्या ।
प्रीत्या प्रजाः किल यदा स्वसुतानिवोऽपि ।। (रेग्मी, २०२७, पृ.३७)

एतया कवितयापि प्रतापमल्लस्य वैशिष्ट्यं महिमानं चोच्चतरं प्रमाणीकुरुते । अत्रापि पाणिनीयव्याकरणसम्मतं भाषिकसौष्ठवं यत्र तत्र द्रष्टुं शक्यते ।

**पाणिनीयव्याकरणव्याख्याने शाहराजानां राणानाञ्चावदानम्**

मध्यकालिकनेपालस्थे पश्चिमक्षेत्र एकं व्यवस्थितं सुविपुलञ्च 'गोरखा' राज्यमासीत् । तत्र १६७१ तमे वैक्रमे रामशाहः राजा बभूव। स राजा संस्कृतज्ञो वैदिकसंस्कृतसंरक्षकश्चासीत्। तेन तत्रत्ये पोखरीथोकनामके स्थाने मुरलीधरनारायणस्य मन्दिरं निर्माय तद्द्वारे संस्कृतभाषानिबद्धः शिलालेखः संस्थापितः। तस्मिन् भित्तिपत्रे मन्दिरस्थापनसम्बद्धं विवरणं निम्नानुसारमस्ति-

विधुगिरिरसपृथ्वीचिह्निते विक्रमाब्दे।
गतवति नृपरामो मानदः सज्जनानाम्।।
मठमधिकविधिज्ञो दिक्षु विक्षिप्तकीर्तिः।
गणपतिप्रभृतीनां देवतानामकार्षीत् ।। (वज्राचार्यः [सङ्कलकः], २०३७, पृ.९)।

उपरि वर्णितायां प्रथमपङ्क्तौ- विधुगिरिरसपृथ्वीचिह्निते इति पदे तृतीयातत्पुरुषसमासो दृश्यते। तस्य विग्रह एवं कर्तुं शक्यते- विधुश्च गिरिश्च रसश्च पृथ्वीश्च विधुगिरिरसपृथ्व्यः, तैः चिह्निते...। एवमेव विक्रमाब्दे गतवति इति पदयोरधिकरणकारकस्य प्रयोगः कृतो विद्यते। सा च व्यवस्था पाणिनीयेन- यस्य च भावेन भावलक्षणम् (पा.सू.२-३-३७) इत्यनेन विधीयते। अत्र विक्रमसंवत्सरे व्यतीत इत्युक्ते कर्माश्रयी क्रिया साक्षाद् लक्ष्यते। तथैव मठमधिकविधिज्ञ इति पदेऽपि समासो दृश्यते- विधिं जानातीति विधिज्ञः। अधिकं विधिं जानातीति अधिकविधिज्ञः। मठसम्बद्धं विधिमधिकं जानातीति मठमधिकविधिज्ञ इति द्वितीयातत्पुरुषसमासः। अनेन प्रकारेणैव विक्षिप्तकीर्तिरिति पदेऽपि विक्षिप्ता प्रसृता कीर्तिर्यस्य स विक्षिप्तकीर्तिः राजा इति विशेषणसमासः कर्तुं शक्यते। अतस्तदानीमपि पाणिनीयव्याकरणमाश्रित्य संस्कृतस्य पठनपाठने सञ्चाल्येते स्मेति बुध्यते।

नुवाकोटनामकं राज्यं विजित्य गोरखाधीशेन पृथ्वीनारायणशाहनामकेन राज्ञा १८०१ तमे वैक्रम एकः शिलालेखः संस्थापितः । तत्र संस्कृत एवं लिखितो वर्तते-

पारावारद्विरदधरणीनायकैः सम्मितेब्दे ।

राधे मासि त्रिदशगुरुणाऽधिष्ठते मेषराशौ ।।

नेपालेशान् सपदि विगताहङ्कृतीस्तान् विरच्य ।

पृथ्वीनारायणनृपतिना निर्मितन्दुर्गरत्नम् ।। (वज्राचार्यः [सङ्कलकः], २०३७, पृ.९)।

अत्र- पारावारश्च द्विरदश्च धरणीनायकश्च तैः इति तृतीयातत्पुरुषः, त्रिदशानां गुरुस्तेन इत्यत्रापि तृतीयातत्पुरुषः। मेषराशावधिष्ठिते इत्यत्र च एकया क्रियया क्रियान्तरबोधेन भावलक्षणम्। पृथ्वीनारायणनामाख्यो नृपतिः तेनेति विशेषणसमासः इति। एता सर्वविधा व्यवस्थाः पाणिनीयव्याकरणानुसारिण्यो वर्तन्त इति १८०१ तमे वैक्रमेऽपि नेपाले पाणिनीयव्याकरणस्य पठनपाठने सम्यगास्तामिति निर्णीयते।

१८५६ तमे वैक्रमे काष्ठमण्डपस्थे साँखुनामके स्थाने रणबहादुरपत्न्या राजराजेश्वर्या स्वेष्टदेवीं वज्रयोगिनीं संप्रार्थ्य मन्दिरस्य मूलद्वार एवंविधः शिलालेखः संस्थापितः-

वज्रेशीपदपङ्कजे परिणमच्चित्ता मनोज्ञा सती।

ज्ञानध्यानपरायणा सुविनया साम्राज्यलक्ष्मीः परा ।।

योगीन्द्रेण महीभृता रणबहादूरेण भर्त्रा समम् ।

लोकानुग्रहकारिणी विजयते श्रीराजराजेश्वरी ।। (वज्राचार्यः [सङ्कलकः], २०३७, पृ.३०६)।

अत्र- वज्रानामीशः तस्य स्त्री, ज्ञानञ्च ध्यानञ्च ज्ञानध्याने तत्र परायणा, भर्त्रा सममित्यत्र समं इत्यस्य योगे-साकं सार्धं समं सह इति नियमेन तृतीया, लोकानामनुग्रहं करोतीति लोकानुग्रहकारी तस्य स्त्री लोकानुग्रहकारिणी इत्यादिषु पदेषु समासकारकादीनां सम्यक्प्रयोगः प्राप्यते। ये सर्वेऽपि प्रयोगाः पाणिनीयव्याकरणानुशासनाधीना इति हेतोः तदानी (१८५६ तमे वैक्रमे) पाणिनीयव्याकरणस्य सुष्ठुप्रयोगः शिलालेखादिष्वपि भवति स्मेति बुध्यते।

१८६९ तमे वैक्रमे काष्ठमण्डपस्थस्य पशुपतिनाथमन्दिरस्य दक्षिणद्वारे तात्कालिकेन राजपुरोहितेन राधावल्लभ अर्यालमहाभागेन षड्श्लोकात्मकः शिलालेखस्थापनायानुरुद्ध आसीत् । तत्रोट्टङ्कितेषु श्लोकेष्वेक भवगतः पशुपतिनाथस्य प्रार्थनायां केन्द्रितो वर्तते । स एवमस्ति-

सदमलमकरन्दे योगिचेतो मिलिन्दे ।

स्मरणकरमुकुन्दे सच्चिदानन्दकन्दे ।।

कृतजगदभिनन्दे यस्य पादारविन्दे ।

पशुपतिमभिवन्दे वत्सले भक्तवृन्दे ।।(वज्राचार्यः [सङ्कलकः], २०३७, पृ.५७३)।

अत्र- नास्ति मलं यत्र स अमलम् सच्चासौ अमलं सदमलम्, सदमलमेव मकरन्दं सदमलमकरन्दं तस्मिन् इत्यत्र विशेषणसमासः, स्मरणयोग्यः करोऽस्ति यस्य सः, स्मरणकरेण युक्तो मुकुन्दः स्मरणकरमुकुन्दस्तस्मिन्- बहुब्रीहिगर्भितस्तत्पुरुषः। सच्चिदानन्दमेव कन्दं यस्य स तस्मिन्- विशेषणगर्भितबहुव्रीहिः। कृतं जगत् येन स कृतजगत्- बहुव्रीहिः। पादमेवारविन्दं यस्य स पादारविन्दम् तस्मिन्- बहुव्रीहिः। पशूनां पतिं- पशुपतिम्- षष्ठीतत्पुरुषः। भक्तानां वृन्दं तस्मिन्- षष्ठीतत्पुरुषः। अनेन प्रकारेण बहुषु पदेषु पाणिनीयसमासानां सुप्रयोगः प्राप्यत इति हेतोः तदानीं पाणिनीयव्याकरणस्य सुष्ठुप्रयोगो भवति स्मेति ज्ञायते।

शाहकालमध्य एव १९०३ तमे वैक्रमे जङ्गबहादुराणानामकः सैनिकः राज्यशासनं स्वहस्तेऽग्राहीत् । तदनु तद्वंशजा राणाः तात्कालिकान् राज्ञः वशीकृत्य ताँश्चालङ्कारिकत्वेन सिंहासने संस्थाप्य १०४ वर्षं यावद् स्वेच्छया राज्यसञ्चालनं चक्रुः । एतन्मध्य तैः सीमिताधुनिकविद्यालय-भाषापाठशालाभिः सह ५७ संस्कृतपाठशालानां स्थापना सञ्चालनव्यवस्था च कारिता । तत्र व्याकरणकोशनीतिशास्त्रादीनामध्ययनाध्यापनं चलति स्म। तेषु दिङ्लायां स्थिता दिङ्लासंस्कृतपाठशाला (वि.सं. १९३२), काष्ठमण्डपस्था रानीपोखरीसंस्कृतपाठशाला (वि.सं.१९३४) तथा अर्घाखाँचीमण्डलस्था हरिहरसंस्कृतपाठशालाः (वि.सं.१९९३) प्रमुखाः सन्ति। कालान्तरे सम्यग्व्यवस्थापनाभावेन कतिपयेषु विलुप्तेष्वपि उपरि समुल्लिखितास्तु अद्यावधि सम्यक् सुसञ्चाल्यमानाः सन्ति। इतः पूर्वमेव १७७५ विक्रमसन्निकटे मटिहानीगुठी इत्यस्य प्रमुखेण महन्त रामदास तस्मैया नामकेन विदुषा मटिहानीनामके स्थाने मटिहानीराजकीयसंस्कृतपाठशाला स्थापिता, तत्सञ्चालनाय १८०१ तमे वैक्रमे सेनवंशीयेन तत्कालिकेन राज्ञा हेमकर्णसेनेन व्यवस्था कारितेति ज्ञायते। उल्लिखितेष्वनुल्लिखितेषु च तात्कालिकेषु प्राथमिकसंस्कृतविद्यालयेषु मुख्यतो लघुकौमुद्यास्तथा रानीपोखरीसंस्कृतपाठशालायां लघुकौमुदी-सिद्धान्तकौमुद्योः पठनपाठनं भवति स्मेति राणाकालिकैः शैक्षिकप्रतिवेदनैः सम्बद्धलेखैश्च बुध्यते (धमला, ई.२०१९, पृ.१-३)। तदानीं नेपाले संस्कृताध्यापकत्वेन नियुक्ताः प्रायशो गुरवः वाराणसीहरिद्वारवृन्दावनादिषु संस्कृताधीता भवन्ति स्म। तत्र प्रायः पाणिनीयव्याकरणस्य प्रक्रियाक्रमानुसारि पठनपाठनं चलति स्म। अतस्तत्र शिक्षिता दीक्षिताश्च गुरवः पाणिनीयव्याकरणस्य प्रक्रियाक्रमेणैवात्रापि पाठनं

सञ्चालयन्ति स्म। येन नेपाले पाणिनीयव्याकरणस्य प्रक्रियाक्रमानुसारि पठनपाठनस्य विस्तारः लिच्छविकालतोऽद्यावधि सम्यगजायत इति बुध्यते।

२००७ तमे वैक्रमे नेपाले राणासर्वकारस्यान्त्यः प्रजातन्त्रस्योदयश्च जातः। तदानीमपि क्रमशस्त्रिभुवनः (वि.सं.२००९ पर्यन्तम्) महेन्द्रः (वि.सं. २००९-२०२८) वीरेन्द्रः (वि.सं. २०२८-२०५९) ज्ञानेन्द्रः (वि.सं. २०५९-२०६४) नामानो शाहराजानो राज्यसञ्चालका अभूवन्। तै राजभिरपि संस्कृतशिक्षाया व्यवस्थापनाय प्रचाराय च यथासम्भवं प्रयासः कृतोऽवलोक्यते। एतन्मध्ये २०११ तमे वैक्रमे गठितेन राष्ट्रियशिक्षायोगेन प्रदत्ते प्रतिवेदने संस्कृतस्य पठनपाठन-प्रवर्द्धनाय संस्कृतं पठितुकामानां छात्राणां प्रोत्साहनाय च छात्रवृत्तिसहिताऽध्यापनप्रणाली व्यवस्थापिता विद्यालयस्तरे संस्कृतशिक्षासमावेशाय प्रस्तावश्च प्रस्तुतः। तदनु २०१६ तमे वैक्रमे स्थापिते त्रिभुवनविश्वविद्यालये संस्कृताध्ययनसंस्थानं प्रकल्प्य तत्र व्याकरणसाहित्यादिविषयाणां पठनपाठनव्यवस्था कारिता। नवशिक्षायोजनायां प्रवर्तितायां (वि.सं. २०२८ पश्चात्) राष्ट्रियशिक्षापद्धतेः प्रतिवेदनमनुसृत्य साधारणविद्यालयेषु सप्तमाष्टमकक्षयोरनिवार्यविषयत्वेन तथा नवमदशमकक्षयोश्चैच्छिकविषयत्वेन संस्कृतविषयस्य पठनपाठनं समारब्धम्। पुनश्च विद्यालयसंरचनायां संस्कृतमाध्यमिकविद्यालयस्य पृथक्कल्पनं विधाय तत्रापि व्याकरणसाहित्यादीनां विषयाणा पठनपाठनं प्रारब्धम्। पश्चवर्त्तिनि समये राज्ञो वीरेन्द्रस्य शासनाधिकारे शाही आयोगस्य प्रतिवेदनमनुसृत्य २०४३ तमे वैक्रमे महेन्द्रसंस्कृतविश्वविद्यालयस्य संस्थापनं (अस्य नाम वि.सं.२०६४ पश्चात् नेपालसंस्कृतविश्वविद्यालये परिवर्तितः) विधाय तन्माध्यमेन संस्कृतोच्चशिक्षायाः पठनपाठनं तत्रानुसन्धानं पुस्तकलेखनप्रकाशनादिकञ्च तन्माध्यमेन सञ्चालितम्। एतस्मिन् काले तत्र कार्यरतैरनेकैर्गुरुभिः व्यक्तिगतप्रयासेनापि पुस्तकानि विलिख्य प्रकाशितानि सन्ति। तदावधि अद्यपर्यन्तं तादृशीनि शताधिकानि व्याकरणशास्त्रसम्बद्धानि पुस्तकानि, व्याख्यानानि च नेपालसंस्कृतविश्वविद्यालयतः, नैजप्रकाशनभाण्डागारतो व्यक्तिगतप्रयासतश्च प्रकाशितानि सन्ति। यैः पाणिनीयव्याकरणविस्ताराय महान्ति योगदानानि कृतानि सन्ति। राष्ट्रियशिक्षायोगस्य प्रतिवेदनम् (वि.सं. २०४९) कार्यान्वयनानन्तरं साधारणविद्यालयस्य निम्नमाध्यमिकस्तरे (६-८ कक्षासु) अनिवार्यत्वेन संस्कृतविषयो निर्धारितस्तस्य पठनपाठनं २०६१-०६२ विक्रमवत्सरपर्यन्तं सञ्चालितञ्च। एतन्मध्ये द्वन्द्वरतेन माओवादिदलेन संस्कृतस्य पठनपाठननिषेधाद् विद्यालयस्तरेऽनिवार्यविषयत्वेन स्थितं संस्कृतपठनपाठन-मवरुद्धं ततः क्रमशो विद्यालयशिक्षातोऽस्य बहिर्गमनं जातम्। तथापि शताधिकेषु संस्कृतविद्यालयेषु, तस्मादप्यधिकेषु गुरुकुलेषु, नेपालसंस्कृत (महेन्द्रसंस्कृत) विश्वविद्यालये तथा त्रिभुवनविश्वविद्यालयीये केन्द्रीयविद्यापीठेऽद्यापि संस्कृतान्तर्गतानां विभिन्नानां विषयाणामध्यापनं निर्बाधं चलति। तत्र सर्वेषां

संस्कृतविषयाणां मुखं भूत्वा पाणिनीयं व्याकरणमधितिष्ठति। गुरुकुलेषु, संस्कृतमाध्यमिकविद्यालयेषु तथा विश्वविद्यालयस्तरे च संस्कृतान्तर्गतानां सर्वेषां विषयाणां पठनपाठनं पाणिनीयव्याकरणानुशासनमनुसृत्य विधीयते, अतः संस्कृतान्तर्गतै एतैः सकलैर्विषयैः पाणिनीयव्याकरणविस्ताराय प्रत्यक्षाप्रत्यक्षतोऽवदानानि कृतानि दृश्यन्ते । एतेषु सर्वेषु निकायेषु क्वचित् प्रत्यक्षेण क्वचिच्चाप्रत्यक्षेण पाणिनीयव्याकरणमध्याप्यते। अत्र नेपालसर्वकारपक्षस्य समुदायस्य च महद्योगदानं वरीवर्ति।

**पाणिनीयव्याकरणव्याख्याने गणतान्त्रिकसर्वकारस्यावदानम्**

विक्रमस्य २०६५ तमे वर्षे नेपाले राजशासनस्यान्त्यं गणतन्त्रस्य स्थापनञ्चाभूत्। एतस्मिन् काले सङ्घीयसर्वकारेण प्रदेशसंरचना प्रकल्पिता स्थानीयनिकायेभ्योऽधिकारा वितीर्णाश्च। ततः स्थानीयनिकायेषु शिक्षास्वास्थ्यादीनि समागतानि । विद्यालयस्य स्थापनसञ्चालनयोरधिकारप्राप्तेन स्थानीयनिकायेन समुदायमाध्यमेन स्थापितानां गुरुकुलानां संस्कृतविद्यालयानाञ्च विकासाय शिक्षकव्यवस्थापन-निर्माणसञ्चालनानुदानप्रदान-प्रविधिसहयोग-शिक्षकप्रशिक्षणानुगमनादीनि कार्याणि कृतानि क्रियमाणानि च सन्ति। एतादृशैः सहयोगैरनुदानादिभिश्च संस्कृतमाध्यमिकविद्यालयानां गुरुकुलानाञ्च स्थापनसञ्चालनयोर्महदुपकारो जातो दृश्यते । एतद्विधेषु सर्वेषु संस्कृतविद्यालयेषु पाणिनीयव्याकरणस्य प्रक्रियाक्रमानुसारि पठनपाठनं चलति। नेपालदेशीयेषु सकलगुरुकुलस्थेषु प्राथमिककक्षासु रुद्रीचण्डीभिः सह मुख्यतो लघुकौमुद्या अध्यापनं प्रचलति। प्राथमिकछात्रेभ्यः प्रथमतो लघुकौमुदीमध्याप्य तेषु भाषिकसामर्थ्यमर्जयित्वा तदनु विषयान्तरे नीयते। पाठ्यक्रमविकासकेन्द्रनामकेन निकायेन गुरुकुलेभ्यः संस्कृतविद्यालयेभ्यश्च लक्ष्यीकृत्य निर्मते प्राथमिकविद्यालयस्तरीयपाठ्यक्रमे लघुकौमुद्या तानि तानि च प्रकरणानि क्रमशः निर्धारितानि सन्ति। षष्ठकक्षायां लघुकौमुदीमारभ्य नवककक्षायां सा समापनीयेति विकासकेन्द्रस्यावधारणा वर्तते। ततः सिद्धान्तकौमुदी पाठनीयेति तदीयपाठ्यक्रमस्य निर्देशः। अतः नेपालस्थे विद्यालयस्तरे तावताऽद्यावधि पाणिनीयव्याकरणमाश्रित्यैव संस्कृतस्य पठनपाठनं प्रचलत् दृश्यते । अत्रत्यैरेतादृशैः कार्यैः पाणिनीयव्याकरणस्य विस्ताराय महदवदानं प्राप्तमिति निश्चीयते।

**पाणिनीयव्याकरणव्याख्याने नैपालविदुषामवदानम्**

नेपालस्थाः कतिपये वैयाकरणाः सूत्रक्रममाश्रित्यापि ग्रन्थान् रचितवन्तः । कतिपयैस्तु पाणिनीयव्याकरणसम्बद्ध इतिहासे, प्रसिद्धवैयाकरणविषये च ग्रन्था विरचिता वर्तन्ते । नेपालसंस्कृतविश्वविद्यालये प्राध्यापनरताः कतिपये प्राध्यापका विद्यावारिधेर्माध्यमेनापि पाणिनीये व्याकरणे महद्योगदानं कृतवन्तः सन्ति। एतेषां सर्वेषां चर्चाऽत्र क्रमशो विधीयते।

***नैपाला वैयाकरणास्तेषां कृतयश्च :*** नेपालदेशोद्भवाः प्राचीना अर्वाचीनाश्च नैके वैयाकरणा अनुसन्धातारश्च पाणिनीयं व्याकरणं तट्टीकां वा संलक्ष्य व्याकरणग्रन्थान् विरचितवन्तः सन्ति । प्राचीनवैयाकरणस्य उमानाथार्यालस्य– सारकौमुदी तथा वामनकौमुदी, पृथ्वीपालसेनस्य प्रासादकौमुदी, नीलदेवस्य अष्टाध्याय्या लक्ष्यनिर्देशिका टीकाः प्रभृतयः कतिपये ग्रन्था अद्यपर्यन्तं सङ्ग्रहालय एव गुम्फिताः सन्ति। महेन्द्रसंस्कृतविश्वविद्यालयस्थापनपूर्वं नेपालतः प्रकाशिताः पाणिनीयव्याकरणसम्बद्धा ग्रन्थाः प्रतिसंस्कृतासिद्धान्तकौमुदी–कौमुदीसार–श्लोकसिद्धान्तकौमुद्येव दृश्यन्ते । अनुसन्धात्रा लोकमणिदाहालेन स्वकीये व्याकरणशास्त्रेतिहासनामके स्वशास्त्रीयनिबन्धे स्वकृतीनां विवरणे 'अष्टाध्याय्या लघुवृत्तिः' इत्युल्लिखिता अस्ति परं तच्चर्चाऽन्यत्र न समुपलभ्यते । तथैव शिवराजाचार्यकौण्डिन्न्यायनः स्वकृतीनां विवरणे 'अष्टाध्याय्या अत्यावश्यकगणपाठादिः' इति पुस्तकं समुल्लिखति परं तस्या अपि चर्चा अन्यत्र नोपलभ्यते ।

अत्र एतेभ्यो व्याकरणशास्त्रसम्बद्धव्याख्यानग्रन्थकर्तारः सुकृतिदत्तपन्त–सोमनाथसिग्द्यालयोः परिचयः तयोः कृतिगतवैशिष्ट्यञ्च सङ्क्षेपेण प्रस्तूयते ।

***वृत्तिकारः सुकृतिदत्तपन्तः***

नेपालदेशस्थे बाग्लुङमण्डले १८८०–१९३० विक्रमाब्दमभितः स्थितिमान् श्रीमान् सुकृतिदत्तपन्तः पाणिनीयाष्टकसम्बद्धं 'वृद्ध्यादिसूत्राष्टकविवृतिः' नामकमष्टाध्यायीव्याख्यानं विरचितवान् । तद्व्याख्यायां नेपालसंस्कृतविश्वविद्यालये प्राध्यापनरतेन श्रीमाधवशरणोपाध्यायवर्येण विद्यावारिधिरुपाधिर्लब्धः । परं व्याख्यातुस्तद्ग्रन्थोऽधुना सुलभो न दृश्यते । कतिपयनैपालसंस्कृतग्रन्थकारपरिचयनामके विवरणसङ्कलनात्मके पुस्तके सङ्कलकः शिवराजाचार्यकौण्डिन्न्यायनः सुकृतिदत्तपन्तं परिचाय्यापि वृद्ध्यादिसूत्राष्टकविवृतिविषये न किमप्युल्लिखितवान् । सुकृतिदत्तपन्तविरचितं कार्तवीर्योदयनामकं महाकाव्यमनुसन्धित्सुर्जनता विद्यापीठे दाङे प्राध्यापनरतः योगराजशर्मा सुकृतिदत्तपन्तस्य परिचयप्रदानसन्दर्भेऽस्य – वृद्ध्यादिसूत्राष्टकविवृति–लघुशब्देन्दुशेखर–परिभाषेन्दुशेखरटीकाञ्चेति व्याकरणसम्बद्धं ग्रन्थत्रयं समुल्लिखति, परमनुसन्धाता माधवशरणोपाध्यायवर्यस्तु– परिभाषेन्दुशेखरटीकेयं सुकृतिदत्तेन न रचिता, छात्राणामध्ययनसौविध्याय कस्याप्यज्ञातस्य वृत्तिकारस्य वृत्तिः स्वहस्तलिप्यामनेन सारितैव । परं पूर्ववर्त्तिनोऽनुसन्धातारः पाण्डुलिपेरवलोकनं विनैव टीकेयं सुकृतिदत्तस्येति कथितवन्तः, समये व्यतीते सैव भणितिः प्रचलिताऽभूदित्याह। सुकृतिदत्तपन्तस्य काव्यानि, न्याय–साहित्य–तन्त्र–दर्शन–ज्यौतिषादिविषयसम्बद्धा ग्रन्थाश्च समुपलभ्यन्ते ।

सुकृतिदत्तपन्तः संस्कृतव्याकरणे महान् विद्वानासीदिति तद्रचितवृद्ध्यादिसूत्राष्टकविवृतेरवलोकनेन ज्ञायते । तेन वृद्धिरादैजिति सूत्रव्याख्यानेन प्रारब्धा वृत्तिः ७८ पृष्ठान्तं व्याख्यायापि पूर्णा न जाता । यद्यप्यनेन एकं सूत्रमपि न पूरितं तथापि यद् व्याख्यातं तद् महाभाष्य–मञ्जूषा–शेखर–मनोरमादीनां मतमन्थनेन तत्र नागेशमतखण्डनेन च पाण्डित्यपूर्णया पद्धत्या कृतं प्रतीयते । अत्रानेन वृद्धिरादैजिति सूत्रस्य संज्ञात्वमुपपाद्य प्रसङ्गतः शब्दस्वरूपमपि स्वकीयशैल्याऽभिधाय नागेशोक्तः पदपदार्थयोस्तादात्म्यसम्बन्धः पूर्णतः खण्डितः । तथैव कोशस्थाः शब्दाः शब्दपरका भवन्ति वाऽर्थपरका इत्यपि प्रासङ्गिकरूपेण विचारितः । तेनैव प्रकारेण नागेशेन परिभाषेन्दुशेखरे यदागमपरिभाषायाः कृता व्याख्याऽत्र खण्डिता वर्तते । वृत्तिकारोऽयं प्रकृतग्रन्थ एवमङ्गलमाचरति–

भाष्यादूर्ध्वं कुणिप्रभृतिभिर्वामनाद्यैस्ततोऽर्वाक् ।
सूत्रे दाक्षीसुतमुनिकृते कल्पितैवास्ति वृत्तिः ।।
न्यूनाधिक्यं किमपि मनसा तत्र सञ्चिन्त्य नूत्नां
वृत्तिं कुर्वे पृथुहितकरीमिष्टिवाक्यादियुक्ताम् ।। (वृद्ध्यादि.३)
भाष्यं भाष्यत एव सम्प्रति जनैर्नैवार्थतो गम्यते ।
विच्छिन्ना पदमञ्जरीविरहिता नो काशते काशिका ।।
कौमुद्यो निखिलाश्च शेखरपथाद् वक्राः सनक्रापगाः ।
तुल्यास्तच्छिशवः श्रयन्तु सुभगां वृत्तिमदीयामिमाम् ।। (वृद्ध्यादि.४)

वृद्ध्यादिसूत्राष्टकविवृतौ स्थितैरेतैर्मङ्गलपद्यैः– पाणिनीयसूत्रोपरि कुणिप्रभृतिभिः कृते व्याख्याने न्यूनाधिक्यमस्ति, महाभाष्यं सर्वे बोद्धुं न पारयन्ति, विच्छिन्नाभिः पदमञ्जर्यादिभिर्युक्ता सति काशिकापि न चकास्ति, शेखरपथानुयायिनी कौमुद्यपि भ्रष्टा सति नक्रमुखं प्राप्ता विद्यते अतो व्याकरणबुबोधयिषूणां हितकारिणीं विशालां वृत्तिमिमामहं कुर्व इति कारिकार्थः । विश्वेश्वरसूरिकृतस्य व्याकरणसिद्धान्तसुधानिधिनामकस्य व्याख्यानग्रन्थस्य शैल्या रचिते प्रकृतग्रन्थे न सूत्रव्याख्यानपरा विषया एव विवृता अपि तु अर्थसम्बद्धानि नैकान्यपि विषयवस्तूनि समुपस्थाप्य व्याख्यातानि सन्ति । सकृतिदत्तपन्तवर्यो– मम व्याख्यानेन कोऽपि तुष्यतु वा कुप्यतु तत्र नास्ति चिन्तालेशोऽपीत्येवं प्राह–

मुनित्रयोक्तिर्मम वन्दनीया व्याख्यानुकुल्यादभिनन्दनीया ।।
व्याख्यातृवाणी मिलतां विरुन्धां प्रमोदशोकौ न हि मे सकीर्तेः ।। (वृद्ध्यादि.८)

प्राध्यापकस्य माधवशरणोपाध्यायस्य सौजन्येन सम्पादितेयं वृत्तिरद्यावधि पुस्तकाकारे प्रकाशिता न दृश्यते ।

*सिद्धान्तकौमुद्याः प्रतिसंस्कर्ता सोमनाथसिग्द्यालः*

सोमनाथसिग्द्यालस्य जन्म जगन्नाथोपाध्याय–लक्ष्मीलीलादेव्योज्येष्ठपुत्ररत्नत्वेन विक्रमीये १९४१ तमे वर्षे काष्ठमण्डपेऽभूत् । स गेह एव पितुरक्षरारम्भं कृत्वा नेपालराजकीयसंस्कृत–प्रधानपाठशालातः प्राथमिकमध्ययनं प्रपूर्योच्चाध्ययनार्थं वाराणस्यामवस्थितं क्विन्सकलेजं गतवान् । तस्माद् न्यायवैशेषिकं विषयमवलम्ब्याचार्यकक्षां समुत्तीर्णवाँश्च । आचार्याध्ययनं प्रपूय नेपालं प्रत्यागत्य काष्ठमण्डपे स्थितायां राजकीयसंस्कृतपाठशालायाम्, त्रिचन्द्रविद्यापीठे चानेन पाठितम् । पाठनकाल एव नेपालीभाषायां संस्कृते चानेन विंशत्यधिकानि पुस्तकानि रचितानि तेभ्योऽद्यपर्यन्तं द्वादशाधिकानि तु प्रकाशितानि सन्तीति तज्जीवनवृत्तलेखको नरेन्द्रप्रसाइवर्यः सूचयति। सिग्द्यालमहोदयेन नेपालसर्वकारतः पण्डितराजपदव्यपि प्राप्ता। दैववशादसौ २०२९ विक्रमवत्सरस्याश्विनमासस्य २८ गते पञ्चत्वमवाप्तवान् ।

वैयाकरणधुरीणस्य सिग्द्यालस्य प्रतिसस्कृता सिद्धान्तकौमुदी प्रक्रियाक्रमेण विरचितायाः सिद्धान्तकौमुद्याः प्रतिसंस्कारोऽस्ति। ग्रन्थमिमं कारिकाभागेन, मूलभागेन, प्रक्रियाभागेन, विवृतिभागेन, प्रयोगभागेन, प्रश्नभागेन च षड्धा विभक्तुं शक्यते । अत्र दीक्षितकल्पितप्रकरणेभ्यो भिन्नानि पदप्रकरणम्, सर्वनामप्रकरणम्, विशेषणप्रकरणम्, लिङ्गप्रकरणम्, वचनप्रकरणम्, विभक्तिप्रकरणमित्यादीनि सन्ति। व्यावहारिकीं प्रायोगिकीञ्च वस्तुस्थितिमात्मसात्कृत्य उचितया प्रक्रियया, शब्दरूपसाधनादिप्रदर्शनेन, उपशेषपरियोजनया प्रयोगार्थं प्रश्नादिनिदर्शनविधिना विरचितेयं प्रतिसंस्कृता कौमुदी दीक्षितस्य सिद्धान्तकौमुदीं सामान्यतः परिष्कुरुत इति सिद्धान्तकौमुदीप्रतिसंस्कृता सिद्धान्तकौमुद्योस्तुलनात्मकमध्ययन– मिति शीर्षके कृतविद्यावारिधिकः शालिग्रामसुवेदीवर्यः सूचयति ।

विक्रमस्य २०१५ वर्षे रचयित्वा २०१७ तमे वत्सरे प्रकाशितेयं कौमुदी समयोपयोगिनी, बहुपरिश्रमसाध्या,उपकारिणी च प्रतीयते । तात्कालिकस्य गुरोर्हेमराजस्य सत्प्रेरणया निर्देशनेन च रचितेयं प्रतिसंस्कृता पूर्ववर्तिभिर्व्याख्यातृभिः प्रकल्पितप्रकरणक्रमतो भिन्ना अभ्यासादिभिर्युक्ता चास्तीत्यस्य महद् वैशिष्ट्यमस्याः। प्रतिसंस्कारः किमर्थमावश्यक इत्यत्र सिग्द्यालो ग्रन्थारम्भे प्राह–

सिद्धान्तकौमुदीभट्टैर्निबद्धा प्रक्रियाध्वना ।

प्रतिसंस्क्रियते लोकदृष्ट्या व्युत्पत्तिहेतवः ।। (प्रतिसं. कारि.३)

अर्थाद् लोकहिताय, शास्त्रव्युत्पत्तिप्रदर्शनाय च प्रकृतो ग्रन्थः प्रतिसंस्कारपूर्वकं निबद्ध्यत इति व्याख्यातुराशयः।

अत्र नेपालदेशोद्भवानां वैयाकरणानां तेषां पाणिनीयव्याकरणसम्बद्धानां कृतीनाञ्च विवरणमधो दीयते–

**नेपालैर्वैयाकरणैर्विरचिताः पाणिनीयव्याकरणसम्बद्धा ग्रन्थाः**

| **क्रमः** | **वैयाकरणाः** | **शब्दशास्त्रीया ग्रन्थाः, टीका** |
|---|---|---|
| १ | चन्द्रगोमी | चान्द्रव्याकरणम् |
| २ | सुमतिः (वृत्तिकारः) | सुमतिपञ्जिका (चान्द्रव्याकरणे टीका) |
| ३ | पूर्णचन्द्रः (वृत्तिकारः) | शब्दलक्षणविववरणपञ्जिका (चान्द्रव्याकरणे टीका) |
| ४ | रत्नमतिः (वृत्तिकारः) | चन्द्रव्याकरणपञ्जिका (चान्द्रव्याकरणे टीका) |
| ५ | उमानाथशर्मा अर्याल | सारकौमुदी, वामनकौमुदी, लघुशब्देन्दुशेखरविवृतिः |
| ६ | पृथ्वीपालसेनः | प्रासादकौमुदी (पाणिनीयव्याकरणे प्रक्रिया ग्रन्थः) |
| ७ | लक्ष्मणकविः | कवितानिकषोपलः (व्याकरणविषयसम्बद्धं काव्यम्) |
| ८ | नीलदेवपन्तः | अष्टाध्याय्या लक्ष्यनिर्देशिका टीका |
| ९ | सुकृतिदत्तपन्तः | वृद्ध्यादिसूत्राष्टकविवृतिः, लघुशब्देन्दु–परिभाषेन्दुटीका |
| १० | विद्वच्छिरोमणिकुलचन्द्रगौतमः | कृष्णकर्णाभरणम् (काव्यम्, कौमुद्या लकारार्थप्रकरणबोधकम्) |
| ११ | दधिरामपौडेलः | व्याकरणसिद्धान्तसुधानिधिः (प्रथमाध्यायस्य प्रथमपादस्य सम्पादनम्) |
| १२ | माधवभण्डारी | व्याकरणसिद्धान्तसुधानिधिः (पञ्चभागसम्पादनम्) |
| १३ | सोमनाथसिग्द्यालः | प्रतिसंस्कृता सिद्धान्तकौमुदी (२०१८) |
| १४ | विद्वद्वरो रश्मिराजपौडेलः | अष्टाध्याय्याः नेपाली टिप्पणी |
| १५ | छविलालपोख्रेलः | कौमुदीसारः |
| १६ | सुरेशझा | श्लोकसिद्धान्तकौमुदी (द्वादशसाहस्री) |
| १७ | हरिप्रसादशर्माचार्यः | अष्टाध्यायी (शारदाप्रभा व्याख्यामहिता,२०६०) |
| १८ | लोकमणिदाहालः | अष्टाध्याय्या लघुवृत्तिः, प्रतिसंस्कृता मध्यसिद्धान्तकौमुदी, बालकौमुदी, परिभाषेन्दुशेखरः (हिन्दीव्याख्या) |
| १९ | शिवराजाचार्यकौण्डिन्न्यायनः | अष्टाध्याय्या अत्यावश्यकगणपाठादिः |
| २० | भवानीकाफ्ले | लघुसिद्धान्तकौमुद्या भावार्थसुबोधिनी टीका (नेपालीव्याख्या, १९९२) |

| | | |
|---|---|---|
| २१ | स्थानेश्वरगौतमः | वाक्यपदीय (२०७५, संस्कृत तथा नेपाली व्याख्या सहित), व्याकरणप्रवेशिका (२०७०, सहलेखन) |
| २२ | दुर्गादत्तशर्मोपाध्यायः | लघुसिद्धान्तकौमुद्याः सुबोधिनी टीका (नेपालीव्याख्या) |
| २३ | शालिग्रामसुवेदी | प्रारम्भिकव्याकरणाभ्यासः (२०७८), स्वरवैदिकप्रक्रिया (नेपालीव्याख्या, २०७१) |
| २४ | मतिप्रसादढकालः | व्याकरणमहाभाष्यम् (नेपाली अनुवाद, २०७५), परमलघुमञ्जूषा (नेपाली अनुवाद, २०७५), स्वरवैदिकी प्रक्रिया (२०८०) आदि। |
| २५ | मोहनपोखरेलः | सरललिङ्गानुशासनम् (२०६९), तिङन्तप्रकाशः (२०७०), कृत्कारकप्रकाशः (२०७१), शब्दधातुरूपचन्द्रिका (२०७१), ऋजुकौमुदी (२०७६)। |
| २६ | गुरुप्रसादसुवेदी | वाक्यपदीयम् (संस्कृत नेपाली टीका, २०७८), वैयाकरणसिद्धान्तकौमुदी (वैदिकप्रकरण नेपाली टीका, २०७८), महाभाष्यम् (प्रथमद्वितीय आह्निकको नेपाली व्याख्या, २०७८), वैयाकरणभूषणसारः (धात्वर्थप्रकरण नेपाली व्याख्या, २०७८), परिभाषेन्दुशेखरः (नेपाली व्याख्या २०७८), पाणिनीयशिक्षा (२०७८) |
| २७ | नवराजपाण्डेयः | व्याकरणमहाभाष्यम् (२०७५), सिद्धान्तकौमुदी (२०७४), वैयाकरणसिद्धान्तकौमुदी (२०७८), परमलघुमञ्जूषा (२०७३), वैयाकरणसिद्धान्तकौमुदी (२०७८) |
| २८ | विष्णुदाहालः | अष्टाध्यायीसूत्रार्थः (२०७६), पाणिनीयधातुपाठः (२०७८), महेश्वरसूत्रार्थः (२०७५) |
| २९ | भीमकण्डेलः | लघुशब्देन्दुशेखरः (२०७२), वाक्यपदीयब्रह्मकाण्डम् (२०७८), परमलघुमञ्जूषा (२०७८), फक्किकाकारिकाव्याख्यानम् (२०७३) |
| ३० | मोहनीलालनेपालः | कृदन्तज्ञानम् (२०७८) |

| | | |
|---|---|---|
| ३१ | प्रकाशतिवारी | कारिकार्थप्रकाशः (२०७८) पाणिनीयशिक्षा (२०७८) |
| ३२ | भवानीशङ्करभट्टराईः | दशगणीप्रकाशः (२०७१), तिङ्कृत्कारकप्रकाशः (२०७०), प्राच्यनव्यवैयाकरणयोर्मतभेदविमर्शः (२०७१) |
| ३३ | गोविन्दाचार्य/लक्ष्मी शर्मा | सिद्धान्तकौमुद्याः श्रीधरमुखोल्लासिनी हिन्दी व्याख्या (६ भाग, २०६९), लघसिद्धान्तकौमुदी (श्रीधरमुखोल्लासिनी हिन्दीव्याख्यायुता, सम्पादक रघुनाथशास्त्री नेपाल) |
| ३४ | जगन्नाथशर्मा सापकोटा | व्याकरणमहाभाष्यम् (तृतीय आह्निक नेपाली व्याख्या, २०७८), व्याकरणमहाभाष्यम् (चतुर्थ आह्निक नेपाली व्याख्या, २०७८), भ्वादिविशेषशास्त्रविवेचनम् (२०७९), वाक्यपदीयम् (प्रथमो भाग, २०७८), वाक्यपदीयम् (द्वितीयो भाग, २०७९), पदवृत्तिविमर्शः (२०७८) |
| ३५ | भोलानारायणरेग्मी | प्रौढमनोरमासरलार्थाः (२०७८), फक्किकाप्रकाशिका (२०६९) |
| ३६ | सुमनखतिवडा | व्याकरणप्रवेशिका (२०७०) |
| ३७ | पुण्यप्रसादनिरौला | सरलसंस्कृतव्याकरणम् (पञ्चभागात्मकम्) |
| ३८ | धनसमशेरराणा | रौद्रीयव्याकरणकौमुदी |
| ३९ | स्वामिप्रपन्नाचार्यः | पाणिनिव्याकरणखण्डनम्, शब्दानुशासनविमर्शः |
| ४० | लीलानाथपौडेलः | संस्कृत व्याकरण (२०७७, नेपाली विवेचना सहित) |
| ४१ | कुमारखतिवडा | वैयाकरणसिद्धान्तकौमुदी (नेपाली व्याख्या, २०७८), धातुपाठ (२०७८), अष्टाध्यायी (२०७८) |
| ४२ | वैयाकरण मङ्गलकुमार नेपालः | संस्कृतव्याकरणप्रकाशः (२०६६) |
| ४३ | ध्रुवप्रसाद ज्ञवाली | संस्कृतरचनाप्रकाशः (२०५५), व्याकरणस्य संरचनात्मिका व्युत्पत्तिः (२०६६), व्याकरणस्य शिक्षणपद्धतिविमर्शः (२०६६) |

**स्रोतः**- दाहालः (ई.१९९०), कौडिन्न्यायनः (२०४८), भट्टराईः (२०७५), आत्रेयः (२०७६), कण्डेलः (२०७८), नेपालसंस्कृतविश्वविद्यालयसेवायोगस्य मुखपृष्ठम् (२०७९), ढकालः (२०८१) ।

**पाणिनेरैतिह्यान्वेषका नैपाला विद्वाँन्सः**

महामुनेः पाणिनेरैतिह्यान्वेषणेऽपि नैपालकाः कतिपये गवेषका योगदानं प्रददुः । तेषु योगिनरहरिनाथ–शालग्रामशर्मा (शिवराजपोखेल)–टीकारामपन्थी–रामचन्द्रपौडेलप्रभृतयः प्रमुखाः सन्ति। योगिनरहरिनाथः पाणिनिमाश्रित्य कमपि ग्रन्थं तु न ग्रथितवान् तथापि 'अस्माकं देशदर्शनम्' (हाम्रो देशदर्शन) नामके पुस्तके पाणिनेः सम्भावितं तपस्थलं रुरुक्षेत्रमासीदिति समुल्लिखितवान्, पृ. ३४) अर्घाखाँचीमण्डलाभिजनः शालग्रामशर्मवर्यस्तु 'पाणिनितपोभूमिः (पणेना) (२०१५) नामके पुस्तके 'पाणिनीयाः' इति पदमपभ्रंशी भूयः कालान्तरे पणिना–पणेना इत्यभूदिति सङ्केतितवान् । तदेव मतं प्राध्यापकष्टीकाराम–पन्थीवर्योऽपि स्वकीये 'कतिपये जनश्रुतयः' (केही जनश्रुतिहरु–२०४२) नामक ऐतिह्यनिबन्ध ऊररीकुरुते, परं शारदाप्रभाटीकाकारो हरिप्रसादशर्माचार्यस्तु मतमिदं न स्वीकुरुते । शारदाप्रभाटीकाया भूमिकाखण्डे स पाणिनिशब्दस्यापभ्रंशत्वेन 'पणेना' न जातोऽपि तु आकाशात् पतितस्य जलस्य सञ्चयित्र्याः काष्ठद्रोण्याः स्थानीयं नाम तदिति प्राह । याथार्थ्यं यत् किमपि स्यात् पाणिनेर्जीवनवृत्तान्वेषणेऽनेनोपकृतं प्रतीयते। म्याग्दीजनपदाधिजनो गोविन्दप्रसादशर्मा नामकोऽपरो गवेषकः पाणिनेरैतिह्ये पाणिनीयव्याकरणस्यैतिहासिकं परिशीलनं नामकं लघुनिबन्धं रचितवान् परमयं पाणिनेर्नेपालदेशोद्भवत्वे न कुत्रापि चर्चां कृतवान् । एवंविधा पाणिनेरैतिह्ये गवेषणपराणां केषाञ्चिद् विदुषां नामानि तेषामैतिह्यग्रन्थाश्चात्र समुल्लिख्यन्ते ।

**पाणिनेरैतिह्यान्वेषका नैपाला विद्वाँन्सः तेषां कृतयश्च**

| | | |
|---|---|---|
| १. | शालग्रामशर्मा | पाणिनितपोभूमिः (पणेना) |
| २. | टीकारामपन्थी | काचन जनश्रुतयः (केही जनश्रुतिहरु) |
| ३. | गोविन्दप्रसादसापकोटा | पाणिनीयव्याकरणस्यैतिहासिकं परिशीलनम् |
| ४. | रामचन्द्रपौडेलः | संस्कृतव्याकरणं तथा वैयाकरणपरिचयः |
| ५ | लोकमणिदाहालः | संस्कृतव्याकरणशास्त्रेतिहासः |
| ६ | विष्णुराज आत्रेयः | पाणिनिः (उपन्यासः,२०७२), पतञ्जलिः (उपन्यासः,२०७६), वररुचि कात्यायनः (उपन्यासः,२०७७) |
| ७ | नवराजकट्टेलः | पण्डित दधिराम पौडेलका व्याकरणात्मक कृतिहरूको अध्ययन (२०७९) |

स्रोत : आचार्यः (२०६०), ढकालः(२०८१)

एतेभ्योऽन्येऽपि वैयाकरणाः पाणिनीयव्याकरणं तद् विवृतिग्रन्थमधिकृत्य वैयाकरणसिद्धान्तकौमुदीं लक्ष्य, प्रसिद्धवैयाकरणमाधृत्य, नेपालसंस्कृतविश्वविद्यालयस्थे पाठ्यक्रमे स्थितान् पाणिनीयाष्टाध्यायीसम्बद्धान् तद्व्याख्यानग्रन्थाँश्चाधृत्य टीकारामपन्थी, माधवशरणोपाध्यायः, स्थानेश्वरगौतमः, विष्णुराज आत्रेयः, जगन्नाथ अर्यालः, हरिदेवमिश्रः, बुद्धिनाथ अर्यालः, पूर्णभद्रसुवेदी, बोधराजपन्तः, टंकनाथपौडेलः, रोहिणीप्रसादभट्टराईः, पद्मनाभकोइराला, टेकनाथपौडेलः, चेतोनाथ अर्यालः, महादेवरिमालः, घनश्यामपौडेलप्रभृतयः प्राचीना अर्वाचीनाश्च शताधिका वैयाकरणाः टीकाग्रन्थान्, पाठ्यपुस्तकसहयोगिनो व्याकरणसम्बद्धान् लघुग्रन्थान्, अनुवादग्रन्थाँश्च विरचितवन्तः। पाठ्यपुस्तकलेखनप्रकाशनैः सहानुसन्धाने प्रेरणे च संलग्नानां विदुषां योगदानमप्युल्लेखनीयं वर्तते । वैयाकरणनेपालनामकेन विदुषा पाणिनीयव्याकरणाध्येतृभ्यः प्रतिवर्षं पुरस्कारप्रदानायाक्षयकोषस्थापनेन कृतं योगदानमपि महनीयं वर्तते। नेपालो वैयाकरणो विष्णुराज आत्रेयस्तु नैपालकाः वैयाकरणा इत्यस्मिन् लेखे- विद्वच्छिरोमणिकुलचन्द्रगौतमः (वि.सं. १९३४-२०१५), दधिरामपौडेलः (वि.सं. १९३६-२००७), विद्वद्वरो रश्मिराजः (वि.सं. १९४३-२०१५), पण्डितराजसोमनाथसिग्द्यालः (वि.सं. १९८१-२०२९), धनसमशेरराणा (वि.सं. १९५२-२०३९), स्वामिप्रपन्नाचार्यः (वि.सं. १९७९-२०७२), हरिप्रसादाचार्यः (वि.सं. १९८९-२०७२), दुर्गादत्तशर्मोपाध्यायः, पुण्यप्रसादनिरौला (वि.सं. १९९१) प्रभृतीन् वैयाकरणान् पाणिनीयव्याकरणसमुन्नायका नैपाला विद्वाँन्स इत्युल्लिखन् सादरं स्मरति (आत्रेयः, २०७६)। आत्रेयोऽसौ केषाञ्चन वैयाकरणानां व्याकरणग्रन्थेषु सम्प्रत्यलब्धेष्वपि लोकप्रथित्यनुसारं ते नैपाला धुरन्धरवैयाकरणा आसन्निति समुद्घोषयते।

**नेपालसंस्कृतविश्वविद्यालयतः सम्पन्ना व्याकरणविषयका विद्यावारिधयः**

नेपालदेशस्थ–महेन्द्रसंस्कृत– (नाम परिवर्तनेनाधुना नेपालसंस्कृतविश्वविद्यालयो जातः) विश्वविद्यालये कार्यरता पञ्चदश विद्वाँन्सोऽद्यावधि पाणिनीयव्याकरणसम्बद्धेषु विभिन्नेषु शीर्षकेषु विद्यावारिध्युपाधिमधिगतवन्तो दृश्यन्ते । तेषां विवरणमत्र क्रमशः प्रस्तूयते ।

**नेपालसंस्कृतविश्वविद्यालयतः सम्पन्ना पाणिनीयव्याकरणसम्बद्धा विद्यावारिधयः**

| **क्रमः** | **अनुसन्धाता** | **विद्यावारिधेः शीर्षकम्/सम्पन्नवर्षः** |
|---|---|---|
| १. | विष्णुप्रसादशर्मदेवकोटा | प्रक्रियाकौमुदीसिद्धान्तकौमुद्योः समीक्षात्मकमध्ययनम् (२०५२) |
| २ | माधवशरणोपाध्यायः | सुकृतिदत्तपन्तस्य वृद्ध्यादिसूत्राष्टकविवृतिः (२०५६) |

| | | |
|---|---|---|
| ३ | लीलानाथपौडेलः | व्याकरणदृष्ट्या हलिकेलिमहाकाव्यस्य समीक्षणम् (२०६४) |
| ४. | आनन्दप्रसादघिमिरेः | वाजसनेयिप्रातिशाख्यपाणिनीयव्याकरणयोस्तुलनात्मकमध्ययनम् (२०६७) |
| ५. | शालिग्रामसुवेदी | सिद्धान्तकौमुदीप्रतिसंस्कृतासिद्धान्तकौमुद्योस्तुलनात्मकमध्ययनम् (२०६७) |
| ६. | मतिप्रसादढकालः | लोपागमवर्णविकारदृष्ट्या वैयाकरणसिद्धान्तकौमुद्यन्तर्गतानां विधिसूत्राणां<br>तत्रोपात्तानामुदाहरणानाञ्च समीक्षणम् (२०६७) |
| ७. | सरस्वतीपोख्रेलः | पाणिनीयव्याकरणजैनेन्द्रव्याकरणयोः समीक्षात्मकमध्ययनम् (२०६७) |
| ८ | खेमराजखनालः (स्याङ्जा) | पालपाधिपतिना पृथ्वीपालसेनेन विरचितायाः प्रासादकौमुद्याः सविवेचनं सम्पादनम् (२०७०) |
| १२ | जगन्नाथशर्मा सापकोटा | परिभाषेन्दुशेखरस्य भूतिसर्वमङ्गलटीकयोस्तुलनात्मकमध्ययनम् (२०७४) |
| ९ | खेमराजखनालः (धरान) | पाणिनीयव्याकरणशास्त्रका अनुसार शाकुन्तल महाकाव्यमा प्रयुक्त तत्सम<br>शब्दको व्युत्पादन र प्रयोगपरीक्षण (२०७५) |
| १० | भवानीशङ्करभट्टराईः | शब्दशास्त्रीयव्याख्यानतत्त्वदृष्ट्याऽष्टाध्यायीशारदाप्रभाव्याख्यायाः समीक्षणम् (२०७५) |
| ११ | नेत्रविनोदभट्टराईः | श्रीमद्भागवतस्थाव्ययपदानां पाणिनीयव्याकरणदृष्ट्यानुशीलनम् (२०७५) |
| १३ | अश्विनीकुमारखतिवडा | पाणिनीयाष्टाध्याय्यामद्वैतवादः (२०७८) |
| १४ | प्रकाशतिवारी | संस्कृतवैयाकरणानां मतेऽव्ययपर्यालोचनम् (२०७८) |
| १५ | रामचन्द्रकँडेलः | लघसिद्धान्तकौमुद्या भावार्थसुबोधिनी-सुबोधिनीटीकयोस्तुलनात्मकमध्ययनम् (२०७८) |
| १६ | भानुभक्त आचार्यः | सिद्धान्तकौमुदीश्लोकसिद्धान्तकौमुद्योस्समीक्षणात्मकानुशीलनम् (२०८०) |

| | | |
|---|---|---|
| १७ | कार्तिकेयझाः | श्रीशरणदेवस्य दुर्घटवृत्तेर्व्युत्पत्तिमूलकमध्ययनम् (२०८०) |

स्रोतः-अनुसन्धानप्रकाशः (वर्ष–६, पूर्णाङ्क–३, २०७०), ने.सं.वि. प.नि.का. मुखपृष्ठम्, ढकालः (२०८१) ।

**भारतीयेभ्यो विश्वविद्यालयेभ्यो नैपालविदुषा कृता विद्यावारिधयः**

नेपालदेशस्थे संस्कृतविश्वविद्यालयेऽन्यत्र च कार्यरताः स्वातन्त्र्येण राष्टं सेवमानाश्च विद्वाँन्सो मूलतो भारतीयेभ्योऽन्यदेशस्थेभ्यश्च विश्वविद्यालयेभ्यः पाणिनीयव्याकरणमधिकृत्य कृतिप्रकाशनम्, शोधलेखनं गहनाध्ययनञ्च कृतवन्तो दृश्यन्ते । तेष्वत्र भारतीयेभ्यो विश्वविद्यालयेभ्यो नैपालविदुषा कृतस्यावदानस्योल्लेखोऽत्र विधीयते ।

**पाणिनीयव्याकरणे भारतीयेभ्यो विश्वविद्यालयेभ्यो नैपालविद्वद्भिः कृता विद्यावारिधिशोधप्रबन्धाः**

| **क्रमः** | **शोधच्छात्रः** | **शोधशीर्षकम्, सम्पन्नतिथिः, विश्वविद्यालयः,** |
|---|---|---|
| १ | हरिदेवमिश्रः | A critical study of some aspects of Sanskrit grammar with special reference to the Mahabhasya of Patanjali (Puna university India, 1960 AD) |
| २ | टीकारामपन्थी | पाणिनेः पूर्ववर्त्तिव्याकरणपर्यालोचनम् (ई.१९६७, सम्पूर्णानन्द सं.वि.) |
| ३ | केशवप्रपन्नशर्मा | परिभाषावृत्तिपरिभाषेन्दुशेखरयोस्तुलनात्मकमध्ययनम् (ई.१९७८, सम्पूर्णानन्द सं.वि.) |
| ४ | हरिप्रसादशर्माचार्यः | पाणिनीयव्याकरणशिक्षणपद्धतिविमर्शः (ई. १९८१, सम्पूर्णानन्द वि.वि.) |
| ५ | विष्णुराज शर्मा आत्रेयः | परिभाषेन्दुशेखरस्य ज्ञापकसिद्धपरिभाषाणां ज्ञाप्यज्ञापकभावविमर्शः (ई.१९८३, सम्पूर्णानन्द वि.वि.) |
| ६ | गोविन्दप्रसादशर्मा | स्कन्दपुराणान्तर्गतानामपाणिनीयशब्दानां विमर्शः (ई.१९८९, सम्पूर्णानन्द वि.वि.) |
| ७ | जयदत्त उप्रेती | भर्तृहरिप्रणीतवाक्यपदीये शब्दतत्त्वविमर्शः (ई. १९९७, कुमाउ वि.वि.) |
| ८ | विष्णुदाहालः | बौद्धाचार्यकर्तृकपाणिनीयव्याकरणव्याख्यानसमीक्षा (ई. १९९९, सम्पूर्णानन्द वि.वि.) |

| | | |
|---|---|---|
| ९ | विष्णुप्रसादज्ञवाली | व्युत्पत्तिवादानुसारि विभक्त्यर्थविषयकगदाधरभट्टाचार्योक्तमतानुशीलनम् (ई. २००२, सम्पूर्णानन्द वि.वि.) |
| १० | केशवप्रसादपौड्यालः | परमलघुमञ्जूषाया दार्शनिकदृष्ट्याः समीक्षणम् (ई. २००३, सम्पूर्णानन्द वि.वि.) |
| ११ | काशीनाथकण्डेलः | सिद्धान्तकौमुदीगततिङ्न्तप्रकरणमाधवीयधातुवृत्त्योः समीक्षा (ई.२००७, सम्पूर्णानन्द वि.वि.) |
| १२ | डिल्लीराम पौड्यालः | संज्ञासूत्रान्तर्गतानामर्थानामुदाहरणानाञ्च परिशीलनम् (ई. २००८) |
| १३ | गुरुप्रसादसुवेदी | शब्दाद्वैतब्रह्माद्वैतयोस्तुलनात्मकमध्ययनम् (ई.२०१०, काशीहिन्दु वि.वि.) |
| १४ | गोपीनाथकण्डेलः | शब्दाद्वैतविशिष्टाद्वैतदर्शनयोः समीक्षा (ई.२०१०, सम्पूर्णानन्द वि.वि.) |
| १५ | भोलानारायणरेग्मी | वैयाकरणसिद्धान्तलघुमञ्जूषाया दार्शनिकतत्त्वविचारः (ई.२०१०, सम्पूर्णानन्द वि.वि.) |
| १६ | अनिलझा | शरणदेवकृते दुर्घटवृत्तेर्विश्लेषणात्मकमध्ययनम् (ई.२०१२, दरभङ्गा सं.वि.) |
| १७ | विक्रम अधिकारी | श्रीमद्भागवतस्थ एकादशस्कन्धे स्थितानां तिङन्तपदानां समीक्षणम् (ई. २०१८, काशीहिन्दु वि.वि.) |
| १८ | सत्यराज रेग्मी | पाणिनीयव्याकरणव्युत्पत्त्या शुक्लयजुर्वेदरुद्राष्टाध्यायीमन्त्राणां परिशीलनम् (ई. २०१९,दिल्ली) |
| १९ | ध्रुवसापकोटा | **परिभाषेन्दुशेखरस्य भूतिटीकायाः समीक्षात्मकमध्ययनम् (१-५० परिभाषाणाम्, ई.२०२१, सम्पूर्णानन्द सं.वि.)** |
| २० | गोविन्दपौडेलः | वैयाकरणभूषणसारे प्रयुक्तानां मीमांसान्यायानां प्रासङ्गिकतासमीक्षणम् (ई. २०२३, सम्पूर्णानन्द वि.वि.) |
| २१ | बद्रीप्रसादगौतमः | स्फोटदर्शनाद्वैतदर्शनयोस्तुलनात्मकमध्ययनम् (ई.२०२४, सम्पूर्णानन्द वि.वि.) |

**स्रोतः-** गवेषणाविषयसूची (भाग-१, ई. १९९१, भाग-२ ई.१९९७), ढकालः (२०८१) ।

अनेन प्रकारेण लिच्छविकालतोऽद्यावधि पाणिनीयव्याकरणस्य पठपाठनं तदुपरि ग्रन्थटीकादि लेखनञ्च नेपालदेशे नैरन्तर्येण जायमानं विद्यते। लिच्छविकालिकैः मल्लकालिकैः शाहकालिकैश्च पाणिनीयव्याकरणानुसारिभिरभिलेखैः, ग्रन्थप्रकाशनैः पठनपाठनसञ्चालनैश्चास्य व्याकरणस्य प्रभावो नेपाले विशिष्टतमो वर्तत इति वक्तुं शक्यते।

## अवदानप्रक्रियातन्मूल्यञ्च

नेपालदेशीयेन सर्वकारेण, अत्रत्यैः संस्कृतविद्वद्भिः, सङ्घसंस्थाभिः शुभचिन्तकैर्लेखकानुसन्धातृभिश्च पाणिनीयव्याकरणविस्ताराय बहुविधानि कार्याणि कृतानि दृश्यन्ते। लिच्छविकालतोऽद्यावधि तैर्विहितास्ववदानप्रक्रियासु गुरुकुलविद्यालयविश्वविद्यालयादि स्थापनं तत्र पाणिनीयव्याकरणस्य पठनपाठनसञ्चालनम्, राजप्रासादे समये समये विभिन्नान् विदुष आहूय शास्त्रार्थसभासञ्चालनम्, पाणिनीयव्याकरणसम्बद्धेषु नैकेषु विषयेषु ग्रन्थटीकाविवृत्यादि लेखन-प्रकाशनम्, ग्रन्थसरलीकरणम्, लोकभाषासु ग्रन्थानुवादः, भित्तिक्रोडशिलापत्रादिभिर्विषयप्रकाशनक्रमे प्रयुक्तायां संस्कृतभाषायां तदनुशासकत्वेन पाणिनीयव्याकरणस्य प्रयोगः, तथाविधेषु कार्येषु विद्वद्भ्य उत्प्रेरणम्, विक्रमस्य २०५१-०५२ वर्षतः २०६१-०६२ पर्यन्तं सार्वजनिकविद्यालयेऽनिवार्यविषयरूपेण संस्कृतपठनपाठनसञ्चालनम्, विभिन्नेषु सञ्चारमाध्यमेषु पाणिनीयव्याकरणसम्मतया संस्कृतभाषया समाचार-कार्यक्रमादि प्रसारणम्, पाणिनीयव्याकरणानुशासनमाश्रित्य संस्कृतपत्रिकाप्रकाशन-गीतगायन-नाट्यप्रदर्शन-शास्त्रीयसङ्गीतादि निर्माणम्, अव्यवस्थितरूपेण नैजमाध्यमेन च सञ्चाल्यमानानि गुरुकुलानि पाठ्यक्रमनिर्धारण-नियमितपठनपाठनसञ्चालन-वैतनिकसहयोगानुगमनादिभिरनुशासनपथ आनयनमित्याद्योऽवदानप्रक्रियाः वर्तन्ते।

एतादृशा विवरणसङ्कलनकेन्द्रिता लेखाः शास्त्रीयान् विषयान् तत्रस्थिताः समस्याश्च न चकासति। अस्योद्देश्यं इतिहासगर्भेषु गुम्फितानां विकीर्णत्वेनानेकत्र स्थितानां सामग्रीणां प्रकाशनं भवति। अतोऽयं लेखस्तथाविधान् परस्परमसम्पृक्तान् विषयानेकीकृत्य प्रकाशते । लेखोऽयं पाणिनीयव्याकरणं पिपठीःषु छात्रेषु पूर्ववर्त्तिनां वैयाकरणानां व्याख्यातृणाञ्चावदानं प्रस्तुत्यावशिष्टकार्यार्थं नवयुवकान् मुहुर्मुहुरभिप्रेरयति। अतो नेपालदेशे पाणिनीयव्याकरणविकास अद्यावधि कीयन्ति कार्याणि जातानि ? कानि चावशिष्टानीति बोधाय चायं लेखो महान्तमुपकारं करिष्यतीति निश्चितमेव, अस्माद् कारणाद् नेपाले

पाणिनीयव्याकरणविस्तारे सञ्जातानां कार्याणां विवरणप्रदानं  तथाविधाः सामग्रीर्यथासम्भवं व्याख्यानञ्चास्य मूल्यं वर्तते।

**निष्कर्षः**

प्रस्तुतमध्ययनं लिच्छविकालतोऽद्यावधि सर्वकारपक्षतः, संस्कृतसम्बद्धनिकायतः, समुदायतो विश्वविद्यालय-संस्कृतमाध्यमिकविद्यालयगुरुकुलादिभिश्च पाणिनीयव्याकरणस्य विकासाय विस्ताराय च कृतानामवदानानां समुल्लेखने तेषां विश्लेषणे तथा मूल्याङ्कने च केन्द्रितो वर्तते। अस्मिन् क्रमेऽमुत्र-पाणिनीयव्याकरणविस्तारे नेपालदेशेन किमवदानं कृतम् ? नेपालदेशेन तथाविधमवदानं कृतमिति कथं ज्ञायते? तथाविधस्यावदानस्य किं मूल्यम् इति प्रश्नत्रयमुपस्थाप्य तेषामुत्तराण्यन्विष्टानि। उक्तेषु प्रश्नेषु निम्नान्युत्तराणि लब्धानि- लिच्छविकाले, मल्लकाले, शाहकाले तथा गणतन्त्रोत्तरकाले च सर्वकारेण, संस्कृतसम्बद्धेन स्वतन्त्रनिकायेन, विश्वविद्यालयेन, संस्कृतविद्यालयेन गुरुकुलेन च पाणिनीयव्याकरणविकासाय विस्ताराय च कृतमवदानं महद् वर्तते। लिच्छविकाले धर्मदेवपुत्रेण 'मानदेव'नामकेन राज्ञा ५२१ तमे वैक्रमे काष्ठमण्डपनिकट संस्कृतगिरा एकः शिलालेख उट्टङ्कितः । तस्मिन्नभिलेखे पाणिनीयव्याकरणानुसारिणी संस्कृतभाषा प्रयुक्ता दृश्यते। एतेन तात्कालिके नेपालदेशे पाणिनीयव्याकरणस्य पठनपाठनं प्रचलति स्म। तथाविधा विद्वाँन्स नेपालदेशेऽभूवन्निति ज्ञायते। लिच्छविकाल एव चन्द्रगोमीनामकेन नेपालीयविदुषा  चान्द्रव्याकरणं तदुपरि तदुत्तरवर्त्तिभिर्व्याख्यातृभिः सुमतिपञ्जिका-शब्दलक्षणविवरणपञ्जिका-चन्द्रव्याकरणपञ्जिकाप्रभृतीनि व्याख्यानानि रचितानीति विभिन्नैरभिलेखैः स्पष्टीभवति। तदुत्तरवर्त्तिनि मध्यकाले (विक्रमस्य ९००-१८९९ मध्ये) तदन्तर्गते मल्लकाले च प्रताप-सिद्धिनरसिंह-श्रीनिवास-विष्णु-जयप्रकाश-योगनरेन्द्रप्रभृतिभि राजभिः पाणिनीय- व्याकरणस्य पठनपाठनं सञ्चाल्य, संस्कृतविद्वद्भ्यः सम्मानं प्रदाय, लेखनप्रवचनादिषूत्साहं प्रवर्द्धयित्वा, काव्यरचनार्थमभिप्रेर्य, तद्विकासाय नैकविधानि कार्याणि कृतानि दृश्यन्ते। एतस्य प्रमाणत्वेन १७६२ तमे वैक्रमे हरिशङ्करभट्टनामकेन विदुषा काष्ठमण्डपनिकटे चापगाउँ नामके स्थाने शिवमन्दिरं निर्माय तत्रोट्टङ्किते नामधातुमयेन शिलालेखेन प्रमाणितो भवति। मल्लकालिकाः कतिपये राजानोऽपि पाणिनीये व्याकरणे निपुणा आसन्निति योगनरेन्द्रमल्लश्रीनिवासमल्लप्रभृतिषु राजसु प्रयुक्तेन 'व्याकरणशास्त्रपारगः' इति विशेषणेनावबुध्यते। न मल्लराजान एव अपितु मध्यकाले जाता रामशाह-द्रव्यशाह-पृथ्वीनारायणशाह-गीर्वाणयुद्धवीरविक्रमशाहप्रभृतयो राजानः राजराजेश्वरीसदृश्यो राजमहिष्योऽपि संस्कृतनिष्ठावत्योऽभूवन्निति तदानीन्तनीयैः पाणिनीयव्याकरणानुशासननिबद्धैरभिलेखैरन्यविधैः कार्यैश्च प्रमाणितो भवति। राणाकाले

देवसमसेरधीरसमसेरप्रभृतिभिः शासकैः ५७ सङ्ख्यायां संस्कृतपाठशालास्थापनाय सञ्चालनाय चानुमतिः प्रदत्ता दृश्यते। मध्यकाले १७७५ तमे वैक्रमे मटिहानीगुठी इत्यत्र तत्रत्यप्रमुखेण रामदासतस्मैया नामकेन विदुषा मटिहानीराजकीयपाठशालायाः स्थापनमकरोत् तस्यै पाठशालायै तात्कालिकेन सेनराज्ञा हेमकर्णेन सञ्चानव्यवस्थापनाद्यनुमतिः प्रदत्ता आसीदिति बुध्यते। तदनु राणाकाले १९३२ तमे विक्रमे दिङ्लानामके स्थाने दिङ्लासंस्कृतपाठशाला, १९३४ तमे विक्रमे काष्ठमण्डपे रानीपोखरीसंस्कृतपाठशाला तथा १९९३ तमे विक्रमे अर्घाखाँचीमण्डले च हरिहरसंस्कृतपाठशालाः स्थापिता दृश्यन्ते। तेषु सर्वेषु संस्कृतविद्यालयेषु पाणिनीयव्याकरणमेव मुख्यतया पठनपाठनमाध्यमोऽभूदिति तत्रतत्रत्यैः प्रमाणैर्ज्ञायते। प्रजातन्त्रस्योदयानन्तरं त्रिभुवनमहेन्द्रवीरेन्द्रज्ञानेद्रादिभिर्राजभिरपि संस्कृतस्य तदाधारभूतस्य पाणिनीयव्याकरणस्य च विकासाय विद्यालयस्तरे संस्कृतपाठनव्यवस्था कारिता, महेन्द्रसंस्कृतविश्वविद्यालयः संस्थापितः, संस्कृतमाध्यमिकविद्यालयानां विकासाय विशेषारक्षणं प्रदत्तञ्च। गणतन्त्रोत्तरकालेऽपि स्थानीयनिकायेन शिक्षाया अधिकारग्रहणानन्तरं स्थानीयस्तरे सञ्चालितानां गुरुकुलानां सुव्यवस्थापनाय तत्र शिक्षकव्यवस्थापनाय चानेकानि कार्याणि विहितानि विधीयमानानि च सन्ति। पाणिनीयव्याकरणसम्बद्धा लेखकाः, तद्विषये कृतविद्यावारिधिका विद्वाँन्सः तद्विषयाध्यापकाः, तत्प्रचारकाश्च संस्कृतभाषाया तद्वाङ्मयस्य चाधारभूतस्य पाणिनीयव्याकरणस्य विस्ताराय तत्प्रचाराय चानेकानि कार्याणि कुर्वाणः सन्ति, अतः नेपालतो भारतश्च पाणिनीयव्याकरणस्य विभिन्नान् विषयानाश्रित्य ३८ सङ्ख्यातोऽधिका विद्यावारिधयोऽद्यावधि सम्पन्नाः तथा पञ्चाशदधिकैर्लेखकैः शताधिकानि पुस्तकविवृत्यादीनि लिखितानि प्रकाशितानि च सन्ति। अतः पाणिनीयव्याकरणविस्ताराय नेपालदेशेन महदुपकृतं वर्तत इति सारः। प्रकृतलेखः स्नातकोत्तरस्तरे विद्यावारिधिस्तरे चाधीयानेभ्योऽनुसन्धातृभ्यः पाणिनीयव्याकरणे नेपालदेशतो जातानां कार्याणां विवरणप्रदानाय समर्पितः। अतस्तथाविधान् छात्रान् विशेषत उपकरिष्यति। तथैव नेपाले संस्कृतभाषाया वाङ्मयस्य च विकासः कथमभूदिति ज्ञातुकामान् छात्रान् सहयोगी भविष्यति। पाणिनीयव्याकरणसम्बद्धकृतीनां व्याख्यानाञ्च विवरणप्रदाने केन्द्रितेन प्रकृतलेखेन सम्बद्धग्रन्थेषु टीकादिषु च प्रवेशो न कृत इत्यस्य सीमा।

अन्त्ये प्रकृतलेखनिर्माणक्रमे विवरणप्रदातृभ्यो विद्वद्भ्यः सम्बद्धसामग्रीणामधिकारीभ्यश्च हार्दं धन्यवादं वितरामि।

## सन्दर्भसामग्रीसूची

आचार्यः, हरिप्रसादशर्मा (२०४३) *पाणिनीयव्याकरणशिक्षणपद्धतिविमर्शः,* (अप्र.विद्या.शोधप्राग्रूपम्), सम्पूर्णानन्द सं.वि.।

....(२०६०) *अष्टाध्यायी* (शारदाप्रभाव्याख्या महिता), म. सं. वि. ।

आत्रेयः, विष्णुराजः (२०७६), 'नैपालका वैयाकरणाः', *संस्कृतं नेपालभारतयोः सम्पत्तिः*, (नेपालभारतसंस्कृतसम्मेलन स्मारिका), स्वामिविवेकानन्द सांस्कृतिककेन्द्रम् ।

उपाध्यायः, माधवशरणः (२०५६), *सुकृतिदत्तपन्तस्य वृद्ध्यादिसूत्राष्टकविवृतिः*,(अप्र.विद्या.शोधः), म.सं.वि.।

कट्टेलः,नवराजः (२०७९), *पण्डित दधिराम पौडेलका व्याकरणात्मक कृतिहरूको अध्ययन,* नेपालप्रज्ञाप्रतिष्ठानम् ।

कण्डेलः, रामचन्द्रः (२०७७), *लघुसिद्धान्तकौमुद्या भावार्थसुबोधिनी-सुबोधिनीटीकयोस्तुलनात्मकमध्ययनम्* (विद्या.अप्र.शोधः), नेपालसंस्कृतविश्वविद्यालयान्तर्गत-मनुसन्धानकेन्द्रम्।

कौण्डिन्न्यायनः, शिवराजः (२०४८), कतिपयनैपालकसंस्कृतग्रन्थकारपरिचयः, देवी आचार्याणी।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः (ई. १९९१) *गवेषणाविषयसूची* (भाग-१), सम्पूर्णानन्द सं. विश्वविद्यालयः ।

.... (ई. १९९७) *गवेषणाविषयसूची* (भाग-२), सम्पूर्णानन्द सं. विश्वविद्यालयः ।

चन्द्रगोमी (सम्पा. फतहसिंहः), (ई.१९६७), *चान्द्रव्याकरणम्* , राजस्थान प्राच्यविद्या प्रतिष्ठान।

चालिसे, नारायणः (सम्पा.) (२०७०), *अनुसन्धानप्रकाशः, (वर्षः ६, पूर्णाङ्कः ३), ने.सं.वि. अनुसन्धानकेन्द्रम्।*

ढकालः, मतिप्रसादः (२०८१), *पाणिनीयव्याकरणका अनुसन्धानको समीक्षा* (भाग-२), आगमढकालः ।

.... (२०८१), *पाणिनीयव्याकरणका अनुसन्धानको समीक्षा* (भाग-३), आगमढकालः ।

दाहालः, लोकमणिः (ई. १९९०), *संस्कृतव्याकरणशास्त्रेतिहासः*, भारतीयविद्याभवनम्।

धमला, गणेशः (ई२०१९), 'राणाकालीन नेपालको शिक्षाको संरचना', *रेन्वो जर्नलः*, (८-१) ।

पन्थी, टीकारामः (२०४१), *केही जनश्रुतिहरू*, किरणपुस्तकालयः ।

पाण्डे, रुद्रराज तथान्ये (२०११), *नेपाल राष्ट्रियशिक्षा आयोगको विवरण (२०११),* कलेज अफ एजुकेसन।

पौडेलः, सुधनः (सम्पा.) (२०६५), *अनुसन्धानप्रकाशः,* ने. सं. वि., अनुसन्धानकेन्द्रम् ।

भट्टराईः, भवानीशङ्करः (२०७५) *शब्दशास्त्रीयव्याख्यानतत्त्वदृष्ट्याऽष्टाध्यायीशरदाप्रभाव्याख्यायाः समीक्षणम्,* (अप्र. विद्या.शोधः), ने.सं.वि. अनुसन्धानकेन्द्रम्।

राष्ट्रिय शिक्षा आयोग, (२०४९), *राष्ट्रियशिक्षा आयोगको प्रतिवेदन (२०४९,सारसंक्षेपः),* राष्ट्रिय शिक्षा आयोग।

रेग्मी, जगदीशचन्द्रः (२०२७), 'प्रतापमल्लका पाँच अभिलेख', *प्राचीन नेपाल,* (१३, २०२७ कार्तिक)।

वज्राचार्यः, धनवज्रः (२०३०), *लिच्छविकालका अभिलेख* , नेपाल र एसियाली अध्ययन संस्थान।

.... (२०३७), *शाहकालका अभिलेख* (प्रथम भागः), नेपाल र एसियाली अनुसन्धान केन्द्र।

.... (२०५६), *मध्यकालका अभिलेख,* नेपाल र एसियाली अनुसन्धान केन्द्र।

श्री ५ को सरकार, (२०२८), *राष्ट्रियशिक्षा पद्धति २०२८-०३२ सम्मको योजना,* श्री ५ को सरकार शिक्षा मन्त्रालय।

सिग्द्यालः, सोमनाथः (२०१७), *प्रतिसंस्कृता सिद्धान्तकौमुदी,* नेपालराजकीयप्रज्ञाप्रतिष्ठान ।

## अङ्ग्रेजी सन्दर्भसामग्री

Timalsina, Ramhari (AD.2022), *THE SUMATIPAÑJIKĀA COMMENTARY ON CĀNDRAVYĀKARAṆA VṚTTI* (1.1 AND 1.4), PHD thesis, École françaised Extreme - Orient